अलंकारकौस्तुभः
२५८

अलंकारकौस्तुभ
॥१॥

॥श्रीगणेशायनमः॥ रत्नन्यस्तेरसंक्रांतिमधुवावक्रांतरेखादराद्दोर्विक्षेपनिषिद्ध
कुंभविवरन्यस्तत्ताहिरेफोत्करं॥ अंबायाधयतःपयोधरयुगंतिर्यग्दृः मिथःपश्यतो
र्बाल्यस्नेहविमृजृंभितंविजयतेद्वैमातुरस्कंदयोः॥१॥ लोकस्वांतघनांधकारप
टलध्वंसप्रदीपांकुराविद्याकल्पलताप्रतानजननेबीजंनिजासंगिनां॥ मध्येमौ
लिममासतांसुविमलामालायमानास्थिरंश्रीलक्ष्मीधरविद्वदंघ्रिनलिनोदीताः
परागाणवः॥२॥ अथलिंकाराणांभूरिग्रंथस्थितंसारं॥ संगृह्णातिसुखेनतत्प्ये
विश्वेश्वरोन्येषां॥३॥ धियांवैधेयानांभवतिविषयोबुधानांसाधानांनवचकुतुक
मेताहृशास्त्रंकृतेः॥ तथापीयंपारिप्लवयतिमनोमेसुमहतांनिबंधानामेकीभवितुम ॥१॥

सावविषयोर

भिसंधाननिवहः ॥ ७ ॥ अथतेषामुद्देशः ॥ उपमानन्वयउक्तः स्यादुपमेयोपमोत्प्रे
क्षा ॥ संदेहरूपकापह्नुतयः श्लेषः समासोक्तिः । प्रोक्तानिदर्शना ऽप्रस्तुतप्रशंसाप्य
स्तू तिशयोक्तिः । प्रतिवँ स्तूपमयासहदृष्टांतोदीपतुल्ययोगित्वे । व्यतिरेकश्चाक्षेपोवि
भावनाप्यथविशेषोक्तिः । तदनुयथासंख्यार्थान्तरविन्यासौविरोधभावोक्ती । व्या
जस्तुतिः सहोक्तिर्विनोक्तिपरिवृत्तिभाविकान्यपि च । अथकाव्यलिंगपर्यायोक्तोदा
त्तंसमुच्चयस्तद्वत् । पर्यायोप्यनुमानंपरिकरः कितवोक्तिपरिसंख्याः । कारणमाला
ऽन्योन्योत्तरसूक्ष्मंसारः स्यात्संगत्या । ससमाधीसमँषमावधिकाख्यंप्रत्यनीकमी वि
लितवत् । एकावलिस्मृतिभ्रमप्रतीपसामान्यवान्विशेषश्चातरतद्गुणवान्स्या

अलं॰ कौ॰
॥२॥

व्याघातः संसृष्टिसंकरौ चेति। कथ्यंत एकषष्टिर्विद्वत्प्रवरैरलंकाराः॥१॥ तत्र प्रथमं
यत्किंचित्काव्यबंधेषु सादृश्येनोपमीयते। उपमा नाम सा ज्ञेया गुणाकृतिसमाश्र
येति भरतवचनात्। प्रकृतिभूतत्वेन सर्वालंकारेषु भ्यर्हितत्वादुपमा निरूप्यते इति त
ल्लक्षणमाह। तत्रैकवाक्यवाच्यं साधर्म्यं भिन्नयोरुपमा। तत्र निरूपणीयेषु अलंकारे
षु मध्ये इत्यर्थः। उपमेयोपमावारणाय एकेति। व्यंग्योपमावारणाय वाच्येति। अनन्व
यव्यावर्तनाय भिन्नेति। फलितार्थस्तु। यत्सादृश्यप्रतियोगितायां उपमेयतावच्छेदका
वच्छिन्नत्वस्याश्रयमात्रवृत्तित्वानवच्छेदकधर्मसामानाधिकरण्योभयाभावः सा उप
मा। यन्नु बुबोध्यायां सादृश्यप्रतियोगितायामित्यर्थः। चंद्र इव मुखमित्यादौ चंद्रनिष्ठ

सादृश्यप्रतियोगितायांउभयाभावसत्वाल्लक्षणासमन्वयः स्फुट एव। अनन्वयेऽतिव्याप्तिवा
रणायउपमेयतावच्छेदकावच्छिन्नत्वाभावउक्तः। तत्रतदुपमेयतावच्छेदकचंद्रत्वावच्छिन्नत्वस
त्वान्नदोषः। व्यतिरेकातिव्याप्तिवारणायसत्वाश्रयेत्यादि। उभयपत्रस्थपदंप्रतियोगितापरं। त
त्रतूपमेयापेक्षयोपमानेपकर्षणैवेननियमात्। प्रतियोगिताश्रयउपमानेतन्मात्रवृत्तिःप्र
तियोगितानवच्छेदकश्चधर्मोऽपकर्षप्रयोजकः। तत्सामानाधिकरण्यमेवसादृश्यप्रतियो
गितायामितिनव्यभिचारः। उक्तधर्मश्चतद्वाक्योपस्थाप्योग्राह्योऽन्यथाअसंभवापत्तेः। नचै
वमप्यनुपात्तापकर्षहेतुधर्मकव्यतिरेकेव्यभिचारः। अलंकारसास्राँलारकोपाध्यवच्छेदे द्विभाज
नतथात्वस्यविवक्षितत्वात्। चंद्रइवमुखमित्यत्रापिचंद्रमात्रवृत्तिचंद्रत्वसामानाधिकर

अलं. को.
॥३॥
3

ण्यं सादृश्यप्रतियोगितायामस्तीत्यसंभववारणाय स्वानवच्छेदकेति॥ चंद्रत्वस्य तु सादृ
श्यप्रतियोगितावच्छेदकत्वमेवेति न दोषः। तत्रैव तादृशप्रतियोगितानवच्छेदकाह्लादकत्वा
दिधर्मसामानाधिकरण्यं प्रतियोगितायामस्त्येवेत्यसंभवतादवस्थ्यमेवेत्यत उक्तं स्वाश्र
यमात्रवृत्तीति। तत्रापि मात्रपदानुक्तौ आह्लादकत्वादेरपि चंद्रवृत्तित्वाद्दोषएवेति। मात्रे
ति। तत्रोपमेयवृत्तित्वस्यापि सत्त्वान्न प्रतियोगिताश्रयमात्रवृत्तित्वं। ननु चंद्र इव चंद्रो मुख
च[illegible]रमणीयमित्यत्राऽतिव्याप्तिः। चंद्रनिष्ठसादृश्यप्रतियोगितायां उपमेयतावच्छेदकावच्छि
न्नत्वाभावसत्वात्। अत्राहोके वचंद्रनिष्ठासादृश्यप्रतियोगिता मुखनिष्ठोपमेयतानिरूपि
ता चंद्रनिष्ठोपमेयता निरूपिता च। न चात्रोपमेवेति वाच्यं। अनन्वयोपमासमूहालंबनरूपे

नाऽतथात्वात्। नचोपमांशेलसत्तामस्त्येव। अनन्वयांशेतूपमेयतावच्छेदकावच्छिन्नत्वस

त्वादेवनव्यभिचारइतिवाच्यं। प्रतियोगितायाऐक्यस्योक्तत्वेनचंद्रनिष्ठोपमेयतानिरू

पितसादृश्यप्रतियोगितायामुखनिष्ठोपमेयतानिरूपितसादृश्यप्रतियोगितारूपत

या। चंद्रनिष्ठोपमेयतानिरूपितसादृश्यप्रतियोगितायामपिउपमेयतावच्छेदकावच्छिन्नत्वा

भावसत्वादतिव्याप्तेर्दुर्वारत्वात्। अन्यथाउपमांशेपिलसत्तागमनासंभवात्। नचतत्र

चंद्रनिष्ठोपमेयतानिरूपितामुखनिष्ठोपमेयतानिरूपितासादृश्यप्रतियोगिताभि

न्नेतिवाच्यं। प्रतियोगितावच्छेदकभेदादेवप्रतियोगिताभेदात्। भूतलनिष्ठायांतान्योन्या

ऽभावनिरूपितायाघटनिष्ठप्रतियोगिता [illegible] याभेदाभावात्। नन्वेवंचंद्रवृत्ति

अलं॰कौ॰
।।५।।
५

सादृश्यप्रतियोगितायामुपमेयतावच्छेदकावच्छिन्नत्वाभावो नास्तीति असंभव एवेति
चेत् मैवं। तदुपमावाचकपदान्वयिचंद्रपदबोध्याया एव प्रतियोगितायाविवक्षितत्वा
त्। उक्तस्थले त्वेवंविवक्षायामप्युक्तिव्याप्तिस्तदवस्थैवेति चेत्। उच्यते। उभयसादृश्यनिरू
पितप्रतियोगितायामत्र भेदाभ्युपगमे न दोषाभावात्। न चोक्तदोषः। अतिरिक्तप्रतियो
गितापक्षेऽनुपपत्त्यभावात्। अत एव चंद्रेण चंद्रनिष्ठसादृश्यप्रतियोगीति बाधधीसत्त्वे
पि चंद्र इव चंद्रो मुखं च रमणीयमिति वाक्यान्मुखं चंद्रप्रतियोगिकसादृश्यवदिति बोधो
दयोऽनुभवसिद्ध इति। उपमानोपमेयत्वं चात्र तत्त्वेन लोकप्रसिद्धत्वं अतो न प्रतीपेपि व्यभि
चारः। तत्र मुखप्रतियोगिकसादृश्यस्य चंद्रवर्णनीयतया सादृश्यप्रतियोगितायामुप

मेयतावच्छेदकावच्छिन्नत्वसत्त्वात्।।एवमुपमेयोपमायामपि नातिव्याप्तिः। उपमानोपमेययोर्लोकप्रसिद्धयोरेवोपादा
नमित्यस्याभिमतत्वेन तत्र १

।।५।।

मुखमिव चंद्र इत्यत्रोपमेयतावच्छेदकीभूतमुखत्वावच्छिन्नत्वात्सादृश्यप्रतियोगिता
याइतिदिक्॥ अथैवं चंद्रबिंबादिव विषं चंदनादिव चानलः पुरुषाद्वाणिती वक्त्रादित्यसंभा
वितोपमाइत्युक्तोपमायामव्याप्तिः। चंद्रप्रभवत्वविषादेरप्रसिद्धत्वादिति चेन्न। तत्र चंद्र
प्रभवत्वविषादेर्वागुपमानतायाअविवक्षितत्वात्। किंतु यथा। चंद्रबिंबाद्विषं असंभावि
तं तथा त्वन्मुखात्परुषा वागित्युपमास्वीकारादिति न्यायपंचाननादयः। एवं चासंभा
वितोपमेत्यस्याऽसंभावितोपमानकत्वं नार्थः। किंत्वसंभावितत्वेन रूपमायां साधा
रणधर्म इत्येव। तथा च विपर्ययपरुषवचनयोरुपमायां चंद्रचंदनादेर्मुखस्य च बिंबप्रति
बिंबभावः। तेन चंद्रादिनिष्ठकारणताप्रतियोगिककार्यत्वाभावप्रकारकज्ञानविशेष्य

अ·कौ
॥५॥
5

विषमदृशीत्वन्मुखेनिष्ठकारणताप्रतियोगिककार्यत्वाभावप्रकारकज्ञानविशेष्य
भूतापरुषोक्तिरितिपर्यवसितोर्थः॥ यत्रतूपमानतावच्छेदकविशिष्टमुपमानमप्रसि
द्धंतत्रोत्प्रेक्षेव॥ तदुक्तंचक्रवर्तिना॥ यदायमुपमानांशोलोकतःसिद्धिमृच्छति॥ तदो
पमैवयेनेवशब्दःसाधर्म्यसूचकः॥ यदापुनरयंलोकादसिद्धःकविकल्पितः॥ तदो
त्प्रेक्षैवयेनेवशब्दःसंभावनापरइति॥ एतेनस्वतःसिद्धेनभिन्नेनसंमतेनचधर्मतः।
साम्यमन्येनवर्ण्यस्यवाच्यंचेदेकदोपमेतिविद्यानाथीयोपमालक्षणमनूद्यस्वतः
सिद्धेत्यनेननोत्प्रेक्षायांव्यभिचारवारणं॥ ननित्यमस्मिन्परिपूर्णतेतित्युक्तानभः
स्थोपिनलावतीर्णः॥ आनंदयन्निंदुरिवस्वनाम्नाविभातिलोकेनवकाकतीन्द्र इति

ने

धा

तदीयोत्प्रेक्षोदाहरणएवउपमानस्येंदोःस्वतःसिद्धत्वात्। इंदुःसोलिनलावतीर्णत्वाका

रेणकविकल्पितइतिचेत्। तर्हिचंद्रबिंबादिवविषमित्याद्युपमायामव्याप्तिरितिचित्रमी

मांसायांदीक्षितोक्तदूषणमपास्तं। तत्रभूतलावतीर्णत्वविशिष्टचंद्रस्यस्वतःसिद्धत्वा

भावात्। चंद्रबिंबजन्यविषत्वेनोपमानतावच्छेदकमित्यस्यव्यवस्थापितत्वाच्चाप्पदपितैरु

क्तं। उभौयदिव्योम्निपृथक्प्रवाहावाकाशगंगापयसःपतेतां। तेनोपमीयेत तमाल

नीलमामुक्तमुक्तालतमस्यवक्षः इत्यत्रोपमायांविशेष्यस्यापिकल्पितत्वादव्याप्तिरि

ति। तदप्यसत्। तत्रातिशयोक्तेरेवांगीकारात्। प्रवाहस्यस्वसिद्धत्वेनपृथक्त्वेनपातस्ये

त वकल्पितत्वेयाविशेष्यस्यापिकैश्चित्कल्पितत्वादित्युक्तेरसंगतत्वाच्च। यच्चतत्रैवभिन्नेस्य न

अ॰ कौ॰

॥६॥

6

नन्वयव्याहत्तावपि अनंतरत्नप्रभवस्ययस्यहिमंनसौभाग्यविलोपिजातं।एकोहि
दोषोगुणसन्निपातेनिमज्जतींदोःकिरणेष्विवांकइत्युपपादकोपमायामव्याप्तिः।
तत्रोपमेयभूतानांअंककिरणानांउपमानभूतदोषगुणाभिन्नत्वात्।दोषगुणानां
सामान्यत्वात्।अंककिरणानांचतद्विशेषत्वात्।तत्रोपमेयतावच्छेदकभिन्नत्वमुपमा
नतावच्छेदकेविवक्षितं।एवंचदोषत्वांकत्वादीनांभेदोस्त्येवेतिवाच्यं।अनवरतक
नकवितरणधृतजललवकरतरंगितार्थितते:।भणितिरिवमतिर्मतिरिवचेष्टा चे
ष्टेवकीर्त्तिरतिविमलेतिरशनोपमायामव्याप्तेः।मतिष्वुपमानतावच्छेदकानामुप

लो

मेयतावच्छेदकभिन्नत्वाभावात्।उपमेयोपमायामुपमानतावच्छेदक

योर्द्वयोरपितद्भिन्नत्वाभावादुक्तविशेषणेनैवतद्व्यभिचारवारणोपपत्तेरुक्तदेस्यस्यैवैप

र्थ्यापत्तेश्चानवस्त्वोपमेयतावच्छेदकभिन्नधर्मावच्छिन्नत्वमुपमानस्यविवक्षितं।भ

णितिशिवमतिरितिरस्तत्रचोपमानाभिन्नत्वादुपमेयतावच्छेदकमतित्वाद्यन्यत्वभणि

व तित्वादीनांइतिदोषइतिवाच्यम्॥उपाददेतस्यसहस्ररश्मिस्त्वष्टानवंनिर्मितमातपत्रं॥स

नदुकूलादविदूरमौलिर्बभौपतद्गंगइवोत्तमांगेइत्यत्राव्याप्तेः।अत्रशिवत्वस्यैवोपमानोप

मेयतावच्छेदकत्वात्।नचात्रापिदुकूलविशिष्टपरमेश्वरत्वमुपमेयतावच्छेदकं।गंगाविशि

ष्टत्वदुपमेयतावच्छेदकमितिभेदएवेतिवाच्यम्।हारंहारमटन्नभिस्फुः शिरस्त्वेषनयाचते॥

अदत्वामाहृशोमाभूर्दत्वालंत्वाहृशोभवेत्यत्राऽव्याप्तेः।नचायमनन्वयएवेतिवाच्यं।त

धिकरणस्य। उपमेयतावच्छेदकतापर्य्याप्त्य २

अ०कौ० स्यद्धि द्वितीयसदृशाव्यवच्छेदकं फलं स चात्र प्रबाधान्नेति निरुक्तं। तदप्यसत्। उपमानताव
॥७॥ च्छेदकतापर्य्याप्त्यनधिकरणत्वस्याविवक्षितत्वात्। तत्त्वादृशो भवेत्यत्र कालादिकृतभेद
विवक्षया तदनपायात्। अन्यथा उपमात्वस्यैवानुपपत्तेः। तथा चैतत्कालोत्तरकालवृ
त्तं त्तित्वे एतत्कालीनत्वत्सदृशो भवेदित्यर्थः। अन्यथा एतत्कालस्मिन्नेव काले तत्सादृश्याभि
धाने सिद्धसाधनापत्तेः। यद्वा विश्लेषव्यावृत्त्यर्थं धर्मतदृत्यौपयुक्तं। सकलकं लंपुरमेत द्य
ज्जातं संप्रति सुधांशुबिंबप्रतिबिंबमिवेत्यादि श्लेषेपि धर्मसाम्यत्वात्। न चैकत्रकलासा स
कल्यं। अन्यत्र च कोलाहलवत्त्वमित्यनुगतधर्मालाभ इति वाच्यं। तयोरभेदाध्यवसा
येन धर्मैक्यसंपत्तेः। पाण्ड्योयमंसार्पितलंबहारः क्लृप्तांगरागो हरिचंदनेन। आभाति

बालातपरक्तसानुः सनिर्झरोद्गारइवाद्रिराजइत्यादौहारनिर्झरादीनांभेदेपिबिंबप्रति
बिंबभावेनसाधारण्यस्वीकारात्। नचधर्मसाम्येसकलकलमित्यादावुपमैवस्यादिति
वाच्यं। शब्दसाम्येप्युपमात्वस्यदुर्वारत्वात्। यथाप्रह्लादनाच्चंद्रः प्रतापात्तपनोयथा।
तथैवसोभूदन्वर्थोराजाप्रकृतिरंजनात्इत्यादावनुगतार्थशब्दसाम्येप्युपमाद
र्शनादित्यादि। तदप्यसत्। धर्मपदस्यप्रसिद्धगुणादिसाम्यएवोपमानत्वन्यत्रा
पि। यथा। चंद्रवत्कलंकिमुखमित्येतदर्थकत्वात्। संमतपदेनचोपमानस्यैवाऽसंमत
पर स्यव्यावर्त्तनात्। धर्मपदस्यशाब्देतरत्तायाविवक्षितुंशक्यत्वाच्च। पदप्युक्तं। अन्येनव
र्ण्यस्येतिप्रतीपव्यावृत्त्यर्थंविशेषणंतत्रवर्ण्येनप्रकृतेनान्यसादृश्यवर्णनान्नदोषः।

अ० कौ०
॥८॥
8

तत्र चान्यपदस्य वर्ण्यात्प्रकृतादन्येनाऽप्रकृतेनेत्यर्थः। तदाहृतराण्यपि रसांसि पेतुर्वो
नरकोटिषु रजांसि समरोत्थानि तच्छोणितनदीष्विवेति समुच्चितोपमायामव्याप्तिः। त
त्र समरांगत्वेन रजसां शोणितेषु पतनस्यापि वर्ण्यत्वाद्रजसामप्रकृतत्वाभावात्। यदि तु
स्वयं वर्ण्येनावर्ण्येन न वा कुतश्चिद्वर्ण्यादन्येनेत्यर्थः। तदा सूत्कृष्टगुणत्वादुपमानभावम
प्रसमानस्य उपमानत्वकल्पनात्मके प्रतीपेऽव्याप्तिः। यथा अहमेव गुरुः सुदारुणा

ह

नामिति हालाहल मा स्म तात दृप्यः। ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्ज

१२

नानाम्॥ अत्र वर्ण्यानां दुर्जनवचसामप्रकृतहालाहलेन साम्यवर्णनात् इति। तद्दृष्य
सत्त्वा। सादृश्यप्रयोजकतत्प्रतियोगित्वानुयोगित्वतदवच्छेदकेतदन्यप्रकारकधर्मधी

विशेष्यत्वेनाविवक्षितत्वस्यैवान्यपदार्थत्वात्। उक्तप्रतीपेतु दर्पाभावप्रकारकविशे

क्षि ष्यतयापि हालाहलस्य विवक्षितत्वात्। विवक्षोपादानात्तदन्यधर्माणां तत्र सत्वेपि न

क्षतिः। नाप्युक्तोपमायामव्याप्तिः। वस्तुतो रजसां वर्ण्यत्वेपि उक्तविधान्यत्वस्य तत्रान

पायात्। यत्त्वोक्तं। वर्ण्यस्य साम्यं वाच्यमित्यस्य कोर्थः। किमन्यप्रतियोगित्वेन वर्ण्यस्य क

साम्यं वाच्यं। किं वा यथा कथंचिद्वर्ण्यावर्ण्ययोर्भयरूपितं। उत वर्ण्यानुयोगिकत्वेनेति। जि

नाद्यः। सरसिजमिदमाननं च तस्यासममिति चेतसि संमदं विधत्त इत्युभयविश्रांतसा

दृश्योपमायामव्याप्तिः। न द्वितीयः। प्रतीपेऽतिव्याप्तेः। न तृतीयः। वर्ण्यस्य साम्यं वाच्य

मित्यत एव विवक्षितार्थलाभादन्येनेत्यस्य वैयर्थ्यादिति। तदप्यसत्। उक्तविधान्य

अ॰कौ॰

॥९॥

९

प्रतियोगिकसादृश्याधिकरणोपमेयकत्वस्यैव तदर्थत्वात्। कस्यापि दोषस्याभावात्।
सरसिजमिस्यचन्द्रिमुखप्रतियोगिकपद्मानुयोगिकस्य पद्मप्रतियोगिकमुखानुयोगि
कस्य च साम्यस्य प्रतीतिः। तत्र निरुक्तमन्यत्वं पद्मस्यैव। न तत्प्रतियोगिकसादृश्याधिक
रणं च मुखमिति। प्रतीपे तु सादृश्यान्यत्वं नास्त्येव। अन्यादिपदकदंबेनैव तादृशार्थला

।लुप्तमे

भान्न तद्द्वैयर्थ्यमिति। यदप्युक्तं एकदेश्युपमेयोपमावारणार्थं उपमेयत्वाभिमतप्रतियो
गिकसादृश्यवर्णनकालानवच्छिन्नं साम्यं वाच्यमित्यर्थकं तद्द्वेयानिवेशितं। तेन खमि

प

वजलं जलमिव खं इति पर्यायप्रवृत्तायामुपमेयोपमायामतिव्याप्तिवारणेऽपि तद्वत्युना
युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे। प्रस्यंदमानपरुषेतरतारमं

तः स्वच्छकुंतैस्तव प्रचलितभ्रमरं च पद्ममिति युगपत्प्रवृत्तायां तस्यामतिव्याप्त्यनिरा
सात्। तदप्यसत्। सरसिजमिदमित्यस्य तद्वृत्त्यनुनेयत्वादेवैकशीलतया। आद्ये उपमा
द्वितीये। उपमेयोपमेति विभागबीजाऽभावात्तद्वद्दस्यापि लक्ष्यत्वात्। अत एव साहि
त्यदर्पणादौ उपमेयोपमावारणायैकवाक्यवाच्यत्वमेव निवेशितं। अन्यथा त्वदुक्तो
दाहरणेऽतिव्याप्तेस्ततोऽप्यनिरासात्तदसंगत्यापत्तेः। यदि ज्योत्स्नेव नयनानंदः सु   दपि
द   रेवमंकारणं। प्रभुतेव समाकृष्टसर्वलोकाभिनितं विनीतिभिन्नसाधारणधर्ममालो
पमायामव्याप्तिः। तत्रानेकसाम्यप्रतिपादनादिति। तदप्यसत्। उक्तस्यैकदापद
र्थस्यापि सत्वात्। तस्मात्स्वोक्तमेव विस्मृत्य यद्दूषणमेतदिति तन्न किंचित्। पञ्चर्जैर्नीभिः

स्पंदनोद्भूतैर्गर्जितैश्च घनसन्निभैः ॥ भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलमिति परस्प-
रोपमायामव्याप्तिरिति। तदप्यसत्। प्रत्येकं लक्षणसत्त्वात्। उपमाद्वयस्यैव ततः प्रती-
तेः। यत्त्वव्यंग्योपमावारणाय वाच्यमित्ययुक्तं। न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे
इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमैव सत्यत्राऽव्याप्तेरत्र सामान्यवाच्यत्वादिति।
तदप्यसत्। भ्रांतापह्नुताविवैतदंतर्भावात्। दंडिना तु सादृश्यस्य प्रतीयमानत्वस्यैवा-
भिप्रायेणोपमात्वव्यवहारात्। अन्यथा चंद्रारविंदयोः कक्षामतिक्रम्य मुखं तव ॥ आ-
त्मनैवाभवत्तुल्यमित्यसाधारणोपमेत्यादेरपि लक्ष्यत्वेऽनन्वयादिविलोपापत्तेः। एवं
चेत्तदाननमधीराक्षमाविर्दशनदीधितिः। भ्रमद्भृंगमिवालक्ष्यकेसरं भाति पंकजमिति

मि

माया

विशिष्टोपमाक्षिप्तविशेषणोपादानेऽव्याप्तिः। साध्वीश्यामेति वाचकलुप्तायां चंद्र इव सुह
न्मुखमिति साम्यलक्ष्यकपदवदुपमायां चाऽव्याप्तिरितियदुक्तं तदपि न सत्। भंगनेत्रादी
नां बिंबप्रतिबिंबभावापन्नतया अभेदस्यैव विवक्षिततया तदुपमाया अविवक्षितत्वात्।
वाच्यपदस्य व्यंजनाभिन्नवृत्तिविषयत्वस्य विवक्षितत्वेयादोषद्वयस्याभावाच्च। यदपि साम्यं न ४
विधेयतया वाच्यमुच्यतेऽनुवाद्यतया वा। आद्ये। स कर्षन्महतीं सेनां पूर्वसागरगामिनीं। ब
भौ हरजटाभ्रष्टां गंगामिव भगीरथ इत्यादावेव लक्षणं स्यात्। स यथो प्रथमं प्राचीतुल्यः
प्राचीनबर्हिषा। अहितानानिलोद्धूतैस्तर्जयन्निव केतुभिरित्यादौ न स्यात्। अंत्ये व्यतिरेका
लंकारे। मुखेन निःकलंकेन न समस्त्वं च चंद्रमा इत्यादौ निषेधानुवादादतिव्याप्तेः। न च निषे धा

अ॰कौ॰

॥११॥

॥

ग

धाऽप्रतियोगिकत्वेनवाच्यमितिवाच्यं।असिमात्रसहायोपिप्रभुस्तारिपराभवे।नैवान्य
तुच्छजनवत्सर्वविषमहाध्वतिरितिव्यतिरेकेतथाप्यतिव्याप्तेः।नचनिषेधप्रतियोगिको
ट्यननुप्रविष्टत्वेनविशेष्यमितिवाच्यं।वृथाचरसिकिंभृंगतत्रतत्रवनांतरे।मालत्याःस
दृशीक्वापिभ्रमन्नपिनलप्स्यसेइत्युपमानलुप्तायामव्याप्तेः।तत्रसदृशीलाभनिषेधे
सादृश्यस्यापिप्रतियोगिकोटिनिविष्टत्वादिति।तदप्यसत्।स्वाभावप्रयोजकाभावप्रति
योगिकोट्यनुप्रविष्टत्वेनविशेषणात्।स्वपदंसादृश्यपरं।सदृशीलाभनिषेधस्यचनसा
दृश्याभावप्रयोजकत्वमितिनाव्याप्तिः।सगर्वत्वनिषेधस्यचतत्रतुच्छसादृश्याभावप्रयो
जकत्वमेवेतिनव्यभिचारः।एतेनदीक्षितानुयायिनारसगंगाधरकृतोपिनिरस्तः।इत्य

लं विचारांतरेण ॥ ॥ सरस्वतीकंठाभरणे तु। प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः। भूयोव
यवसामान्ययोगः सेहोपमा मतेति॥ तत्रापि दीक्षिता आहुः। ससंजुरश्वक्षुण्णानामेला   गुण३
मुत्पतिष्णवः। तुल्यगंधिषु मत्तेभकटेषु फलरेणवः इत्यादि क्रियादीनां परस्परवर्णनात्मि
कायां। उद्गर्भहूणतरुणीरमणोपमर्दभुग्नोन्नतस्तननिवेशनिभं हिमांशोः। बिंबं कठोरवि
सकांडकडारगौरैर्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति। सद्योमुंडितमत्तहूणचिबुकप्रस्प   ह
दि र्द्धिनारंगकमित्यां प्रसिद्धिरहितोपमानायां कविकल्पितोपमायां वाऽव्याप्तिरिति। तदप्या
पातितः। सामान्यपदस्य धर्ममात्रपरत्वात्। गुणादीनामित्याद्युदोषाभावात्। प्रसिद्धेरनु
रोधेनेत्यस्य च यद्युपमायां तस्य प्रतियोगित्वानुयोगित्वाप्रसिद्धं तदनतिक्रमेणेत्यर्थः। अतो
दिकं

नप्रतीपादौ व्यभिचारः। उद्गर्भहूणसेत्यादौ न हूणरमणीस्तनादि क्रमप्रसिद्धं किंतु तदुपमान
त्वमात्रं। तत्कृत्स्नेनापि प्रसिद्धमिति क्रमस्य समत्वान्न दोषः। नहि तेषामुपमानत्वाभावेपि प्र
सिद्धोयेन तद्विरोधः स्यात्। यदपि तैः स्वयं लक्षणमुक्तं। व्यापार उपमानाख्यो भवेद्यदि विव
क्षितः। क्रियानिःपत्तिपर्यंतं उपमालंकृतिस्तु सेति। उपमितिक्रियानिष्पादको व्यापार उ
पमितिक्रियानिष्पत्तिपर्यंतं विवक्षितश्चेदुपमालंकारः व्यतिरेके तु सा सिरपरस्यावासादृश्य क्षा
वर्णनाया अनिष्पत्तेर्न व्यभिचारः। अनन्वयेपि स्वेतरोपमाननिषेधवक्तृतो ऽनुपमत्व एव ता
त्पर्यात्तदनिष्पत्तेः। तदुक्तं भामहेन। यत्र तेनैव तस्य स्यादुपमानोपमेयता। असादृश्यवि
वक्षातो वदंतितमनन्वयं॥ प्रतीपेपि आकृष्णेयसरोजाक्षि वचनीयमिदं भुवि॥ शशांकस्त

ववक्रे ण पामरै रुपमीयते इत्यादौ यत्र तदनिष्पत्तिर्न तत्र व्यभिचारः। यत्र तु गर्वमसंभाव्य
मिमं लोचनयुगलेन किं वहसि भद्रे॥ संति सदृशानि दिशि दिशि सरस्सु ननु नीलनलिना
नीत्यादौ तन्निष्पत्तिस्तत्रोपमेव तिनतदतिव्याप्तिः। उपमेयोपमायामपि लक्ष्यत्वात्तथैव।
न च सादृश्यवर्णने नोरविशेषात्कथं अनन्वयः प्रतीपादि वैषम्यमिति वाच्यं। प्रतीपादौ
उपमितिक्रियानिष्पत्तेः। अनन्वये च तदनिष्पत्तेः। उपमापरप्रवृत्तिनिमित्तसत्वाऽसत्वयो
रेव वैषम्यप्रयोजकत्वात्॥ अत एव काव्यप्रकाशादौऽनन्वयव्यावर्त्तकमेव विशेषणंद
त्तं। न तु प्रतीपादिव्यावर्त्तकमपीति। उपमापरप्रवृत्तिनिमित्तसत्वासत्वयोरेव वैषम्यप्र
योजकत्वात्। अत्र न्यायपंचाननादयः। उपमितिक्रियानाम साधर्म्यनिष्पत्तिः। साचाऽनन्व

यष्यस्त्येव। भेदगर्भतस्प्रतीतिश्चेत्। भेदनिवेशेन तद्वारणमेव किंमूलकम्। भेदगर्भतज्ज्ञा
नादेव विजातीयोपमितिक्रियानिष्पत्तिरिति चेत्। गोसदृशो गवय कुमुदमिव मुखमित्या
दावपि स्यात्। विलक्षणसाधर्म्यज्ञानादिति चेद् नन्वयं पक्षः। नच तत्र निरूपमत्वप्रतीते
नैवमिति वाच्यं। स्वेतरसाधर्म्यविरहरूपस्य तस्य स्वसाधर्म्यस्य च युगपत्प्रतीत्यविरोधा
त्। किंच। उपमितिक्रियावैजात्यमानाभावः। तद्वैजात्यप्रयोजकाद्रूसवैजात्यस्यैवोक्ति
तत्वात्। नह्हि रूपकोत्प्रेक्षादौ क्रियावैजात्यमलंकारत्वप्रयोजकमिति प्राहुः। रसगंगाधर
कृतस्तु वर्णनस्य विलक्षणशब्दात्मकस्य विलक्षणज्ञानात्मकस्य वा शाब्दवाच्यता विर
हेणार्यालंकारताबाधः। वर्णनस्य सर्वथैवावाच्यत्वात्स्वनिषेधापर्यवसायिनोऽदुर्घट्यं

अ

ग्यसादृश्यवर्णनमुपमेतितदुक्तफलितलक्षणेऽव्यंग्यत्वविशेषणमपिव्यर्थं। यदितुव
र्णनविषयीभूतंतादृशसादृश्यमुपमेत्युच्यते। तदापिगौरिवगवयइत्यादौकालोपसर्ज
नेचतुल्यमितिपाणिनिसूत्रोक्तसादृश्यादौचातिव्याप्तिः। नापिचमत्कारिविषयककं
विव्यापारस्यैववर्णनपदार्थत्वात्प्रकृतेचचमत्काराभावान्नदोषइतिवाच्यं। चमत्कारित्वस्य
निवेशेउपमितिक्रियानिष्पत्तिविशेषणवैयर्थ्यात्। अनिष्पन्नेनापिततःप्रतीयमानेन
सादृश्येनचमत्कारानुपपत्तेः। किंचस्तनाभोगेपतन्भातिकपोलात्कुटिलोलकः। शशांक
बिंबतोमेरोलंबमानइवोरगइत्यादौमुख्यवाक्यार्थभूतत्वेनानलंकारभूतायामुपमाया

ति मव्याप्तिः। उपमितिक्रियानिष्पत्त्यादिसत्वात्। नचेयंलक्ष्यैवेतिवाच्यं। ध्वन्यमानोपमावारण

अ·कौ·
॥१५॥
14
पे

प्रयासवैयर्थ्यात्। नह्यत्रोपमानोपमेयसादृश्यादुपमास्वरूपादस्ति कश्चिदतिरिक्तो वा
क्यार्थो येनोपमातमलंकुर्यात्। किंच। सादृश्यं ऽत्याद्यनर्थकं। उपमितिक्रियानिःपत्तिम
द्वर्णनमित्यत एवेष्टसिद्धेरित्याहुः। तच्चेदं चिंत्यं। तत्र नाभोगेइत्युक्तौ ये सैव तु नक्कविधो नगस्या
प्रसिद्धेः। यत्तु कविकल्पितोपमायामनिर्विषयत्वापत्तिरिति। तन्न। उपमानतावच्छेदकविशि
ष्टोपमानत्वाभिमतस्याप्रसिद्धौ तदुपमानत्वकल्पनस्य तद्विषयत्वात्। अत एव तु उद्भेदहूल
रमणीत्यादिकमेव कल्पितोपमोदाहरणं लिखितं। अन्यथा न नित्यमस्मिन्नरि पूर्णेति
तिइत्यादीनामपि तत्र सा तु भंगापत्तेः। अभ्युत्यापि ब्रूमः। अलंकार्यवाक्यार्थस्याभावात्
अनलंकारत्वमित्युक्तं। नह्येवाक्यार्थ एवालंकार्य इति नियमे प्रमाणमस्ति। सादृश्ये

रव

नमुखस्यैवोत्कर्षात् तस्य विभावतया तदुत्कर्षेणैव रसोत्कर्षात् । अत एव यत्रान्यस्याहृ-
द्यस्य प्रयुक्तोपमेयोत्कर्षविवक्षा तत्रोपमेति न्यायपञ्चाननादयः । किं चैवं प्रस्तुतेऽपि समरेषु त्वां वि-
जयश्रीर्न मुञ्चति प्रभावप्रभवं कान्तं स्वाधीनपतिका यथेति प्रकाशकारोक्तमप्युदाहरणम-
संगतं स्यात् । एवं हंसावलम्बनं ते कीर्त्तिः स्वर्गंगामवगाहते इत्याद्यपि । किं बहुना विभाति वदनं
तस्या नासाग्रस्थितमौक्तिकं ॥ आलक्षितबुधाश्लेषं राकेन्दोरिव मंडलम् इति त्वदीयोपमो-
दाहरणमप्ययुक्तं स्यादिति क्रमेणास्तकलमाकुलं स्यात् । तदुक्तं । बालस्य दीपकलिकाञ्चि-
उपवनगरस्य हृदि । अथ प्राचीनानां व्यंग्योपमाव्यावर्त्तकविशेषणानुपादानात्प्रधा-
नभूतोपमाया अप्यलंकारत्वमुचितमिति नानुपपत्तिः । दीक्षितानां तु व्यंग्योपमाया अलं-

कारत्वमसंमन्यमानानां वाक्यार्थभूतोपमाया अपि नालंकारत्वं स्वीकर्त्तुमर्हं। उभयोः प्रा
धान्याविशेषेण वैषम्ये प्रमाणाभावादिति चेत्। न। मुख्यव्यंग्यस्यानलंकारतयैव धर्मिग्रा
हकमानेन प्रसिद्धेः। वाक्यार्थस्य च रसाद्यंगत्वेन तया सर्वाभ्युपगतत्वादिति बीजसत्वादित्या
दि स्वयमूह्यमिति दिक्। एनां प्रथमं द्विधा विभजते। वाचकधर्मसमस्त प्रतियोग्यनुयोगि
नां ग्रहे पूर्णा। यथा। चंद्र इव मुखं रमणीयमित्यत्र। इह हि इवपदं उपमावाचकं। रमणीयं
साधारणधर्मः। चंद्रः साम्यप्रतियोगी। मुखं तदनुयोगीति चतुर्णामप्युपादानं अत इयं पू
र्णा। तत्र साधारणधर्मस्य क्वचिदनुगामितया प्रयोगः। यथा। उक्कव अदुमंवसेलं हिम
हअकमला अरंवलच्छिविमुक्कं। पीअमइरं वचसअं बहुलपक्ख संवमुद्धअंदविरहिअ

तं
पूर्णा

मा। उत्तवात्तद्गुमत्वादिकमत्र समुद्रगौर्लभयानुगतं। स्यादेतत्। अत्रैकरूपेण धर्मस्योभया
न्वयाभावात्कथमनुगामित्वं। एवं वागर्थाविव संपृक्तौ वागर्थः प्रतिपत्तये। जगतः पितरौ वं
दे पार्वतीपरमेश्वरौ इत्यत्रापि। अत्र हि वागर्थयोर्वाच्यवाचकभावरूपः संबंधः। पार्वतीप
रमेश्वरयोस्तु संयोगरूप इति संबंधतावच्छेदकभेदात्। न च संबंधत्वेन तदिति वाच्यं। येन
रूपेण यस्य धर्मस्योपमानगामित्वं तेनैव रूपेणोपमेयगामित्वमित्यनुगामित्वलक्ष
णमवश्यं वाच्यं। अन्यथा उपचारस्य विश्रांततरत्वोक्त्यनुपपत्तेः। पंजैरैरिवकुमारमीसौले कृ
र्विस्मयेन विकचैः पंपपुंजैरनाहस्तत्र विकचत्वं पुष्पधर्मः ईक्षणेषूपचरितः। न च तत्संभव
ति मुख्यत्वस्योभयसाधारणविकचत्वस्योभयत्रापि सत्त्वात्। न इत्थं च पुष्पेषु विकचत्वं

द्विजातीयपत्रविभागवत्त्वं। नेत्रेषु च निमेषराहित्यं वाच्यमत एकरूपेणाविकृतत्वमुभय
त्रनास्तीति तद्द्वैतो वाच्यः। एवं संपृक्तावित्यत्रापि येन रूपेण संबंधस्य वागर्थयोर्बोधानंत
द्रूपेण पार्वतीपरमेश्वरयोरिति कथमनुगामित्वसंभवः। अथ संबंधत्वं संबद्धाविति धी
साक्षिकः संयोगादिसाधारणो धर्मो विशेषः। तथा च पर्यवसितधर्मपार्यन्तैकधर्माव
च्छिन्नत्वं स एवानुगामित्वपदार्थः। अस्ति च वाच्यवाचकभावसंयोगसंबंधयोरपि संबंध
त्वावच्छिन्नमिति चेत्। तर्हि विकचैरित्यत्रापि मिथः संयोगजनकक्रियाराहित्यमु
भयत्राप्यस्तीति तद्दूषणतादवस्थ्यं। तच्च संयोगस्य पत्रपरस्परादिघटिततया भेदादिति च
त्। संबंधस्याप्यभिन्नागादिनिरूप्यतयानत्वविशेषात्। किंच। अनुगामिधर्मस्य कीदृशेन

त

उभयसाधारणधर्मेणाऽवच्छिन्नत्वं विवक्षितं एतावता येन केनचिदेव प्रमेयत्वादिना
सर्वधर्माणां साक्षात्साक्षात्प्रकारांतराणां विलयापत्तेः। नापि द्रव्यत्वादिना तत्तद्धर्मेण।
बिंबप्रतिबिंबभावस्थले द्रव्यत्वस्य हारनिर्झरोभयवृत्तितया तत्राप्यनुगामित्वापत्तेः।
नापि स्वजन्यशाब्दबोधप्रकारीभूतधर्मेण। वस्तुप्रतिवस्तुभावस्थलेप्यनुगामि
त्वापत्तेः। यांत्यामुहुर्वलितकंधरमाननं तत्वृत्तवृंतशतपत्रनिभं वहंत्येत्यत्रापि वल
नोद्वर्त्तनयोरभेदेन स्वजन्यशाब्दबोधप्रकारीभूतधर्मावच्छिन्नत्वात्। नाप्येकपदज
न्यबोधप्रकारीभूतधर्मेण। तद्दोषानपसरणात्। न च भिन्नवृत्त्येकपदजन्यबोधप्रका
रीभूतधर्मेण उक्तस्थले तु वलनोद्वर्त्तनयोरभेदेन बलनत्वस्यनभिन्नवृत्तित्वमपि

अ॰कौ॰
॥१७॥
17

न्नत्वं चस्वावच्छिन्नप्रतियोगिताकभेदवत्वं। वागर्थाविव्यादौ तु वाच्यवाचकभावसंयोग
योर्भेदस्तु उभयत्र च संबंधत्वमिति वाच्यं। संयोगादेरपि संबंधत्वावच्छिन्नप्रतियोगिता
कपरस्परप्रतियोगिकभेदरहितत्वात्। न च परस्परवृत्तिधर्मावच्छिन्नप्रतियोगिताक
भेदवत्वे सति तादृशपदजन्यबोधप्रकारीभूतधर्मावच्छिन्नत्वमेव तथेति वाच्यं। तथापि
रमणीयत्वादेरसंग्रहप्रसंगात्। अथ साधारणधर्मवाचकपदजन्यबोधप्रकारीभूत
धर्मस्य साधारणधर्मद्वयेसत्वे अनुगामित्वमिति विवेकः। संपृक्तावित्यत्र च तादृशप्र
कारस्य संबंधत्वस्योभयत्रवृत्तेः। हारादौ तु हारत्वादेर्निर्झरादाववृत्तेर्नोऽतिव्याप्तिः॥
द्वयत्वं चाविवक्षितं। अतो यत्रैकरूपेणैव साधारणधर्मपर्यवसानं। यथाऽक्रूवमद्गुमं

वसेलंइत्यादौत्वदुदाहृतेतत्रापिनाव्याप्तिः।नचैवंश्लेषोप्यनुगामिधर्मःस्यात्।नर
सिंहमहीपालसर्वोर्व्यधिगारास्तव।।पारावारसमानत्वंदधातिस्वपदच्युतइत्यत्रस्व
पदजन्यबोधप्रकारीभूतधर्मस्यअच्युतत्वस्यभ्रष्टत्वस्यचप्रत्येकमुभयत्रसत्वात्इ
तिवाच्यं।प्रतीतेरेकपदजन्यत्वस्यवाच्यत्वात्।स्वपदच्युतेत्यत्रचप्रतीतेर्भिन्नभिन्नप
दजन्यत्वात्।नचैवमपिगतेतवभ्रातरिवत्सपंचतांत्विरायनश्यांद्रुमसंकुलंमहत्।अ
हृष्टसंतानतयानशोभतेवनंहरेः।प्राङ्मथनादिवोदधेः।इत्यत्रसंतानपदजन्यबोधप्र
कारीभूतधर्मयोरपितथात्वेनतत्रत्यश्लेषःनुगामित्वप्रसंगस्यदुर्वारत्वमितिवाच्यं।
तत्रपुत्रपारिजातयोःसाधारण्यपर्यवसानात्।पुत्रत्वपारिजातत्वयोश्चसमानाधि

करणाभावादिति। न चद्वयत्वस्याविवक्षितत्वोक्तेः कथमेवमिति वाच्यं। यत्र द्वयोः सा
धारणपर्यवसानं तत्र द्वयत्वस्यापि विवक्षितत्वात्। अतो न दोष इति चेत् मैवं। पीत
घट एव गुणवान् रक्तघट इत्यत्रानुगामित्वाभावप्रसंगात्। गुणत्वजातिमनंगीकु
र्वतां गुणपदात् रूपत्वरसत्वादिप्रकारेणावबोधात्। रसे रूपत्वस्य रूपे च रसत्वस्या
भावात्। वस्तुप्रतिवस्तुभावस्थलेप्यनुगामित्वप्रसंगाच्च। ननु पर्यवसितसाधार
णधर्मयोर्द्वयोरपि यत्रोपमाने उपमेये च संभवः। यथा रूपरसयोर्घटद्वयवृत्त्योः
तत्र साधारणधर्मावच्छेदकीभूतयो रूपत्वरसत्वयोर्मिथः सामानाधिकरण्याभा
वेप्यनुगामित्वमेव। यत्र तु पर्यवसितसाधारणयोर्नोपमानोपमेयोभयवृत्तित्वं

यथा संतानेस्यत्र पारिजातस्य चंद्रवंशे अपत्यस्य च नंदने ऽसत्वात्। तत्रनानुगामित्वं।
किंतु श्लेषएवेति चेत्‌। तत्तुच्छं। तथाहि। द्वयोः साधारणधर्मयोरुपमानोपमेययोरुभय
वृत्तित्वं। किं पर्यवसितसाधारणधर्मनिष्ठधर्मेणावच्छिन्नत साधारणधर्मवाचक
बोधप्रकारीभूतेन। न प्रथमः। वागर्थाविव संपृक्तावित्यत्रापि पर्यवसितसाधारण्ये
यो वाच्यवाचकभावसंयोगयोः साधारणधर्मनिष्ठसंयोगत्वादिधर्मेणोभयाऽवृ
त्तित्वात्। अतएव न द्वितीयः। संबंधत्वेनापि संयोगादेर्वागर्थादाववृत्तेः। किंच। द्वय
त्वं विवक्षितं न वा। नाद्यः। चंद्र इव रमणीयं इत्यादावननुगामित्वानुपपत्तेः। नांत्यः।
वस्तुप्रतिवस्तुभावस्थलेपि तदापत्तेः। अथ साधारणधर्मवाचकपदजन्यबोधप्र

अ॰ कौ॰

॥१९॥

19

कारीभूतधर्मावच्छिन्नयोः साधारणधर्मयोर्यत्र प्रत्येकमुपमानोपमेयोभयवृत्ति
त्वं तत्रत्वावृत्तैवानुगामित्वमिति व्यवस्थितिः संतानपदजन्यप्रकारीभूतपुत्रत्वपा
रिजातत्वयोश्चनोभयावच्छेदकत्वमिति चेत्‌ न। द्वयत्वस्यावश्यमविवक्षणीयत
यावस्तुप्रतिवस्तुभावस्थलेऽतिप्रसंगात्‌। अथ साधारणधर्मवाचकपदजन्यबो
धप्रकारीभूतधर्मावच्छिन्नसाधारणधर्मस्थल एवोक्तविभागः। संतानेत्यत्र तु संता
नत्वं न वाच्यतावच्छेदकमपि तु पुत्रत्वाद्येव संबंधपरस्य तु संबंधत्वं वाच्यतावच्छेद
कं एवं च साधारणधर्मविशेषवाचकपदजन्यबोधप्रकारीभूतधर्मात्साधारणधु
र्मसामान्यवाचकपदजन्यबोधप्रकारीभूतधर्मावच्छिन्नत्वं तत्रैवोक्तविभाग इति

गोध

नदोषः।संतानेत्यत्रहिसाधारणधर्मविशेषवाचकपुत्रादिपदजन्यबोधेप्रकारी
पुत्रत्वादिकंतत्सामान्यवाचकसंतानपदजन्यबोधेऽपिप्रकारः।संपृक्तावित्यत्रतुसं
योगादिपदजन्यबोधेसंयोगत्वंसंबंधादिपदजन्येचसंबंधत्वमितिविशेषात्।वस्तु
प्रतिवस्तुभावेतुधर्मैक्यनियमेनसामान्यविशेषवाचकपदभेदाभावान्नदोषइतिचे
न्मैवम्।यत्रतत्पदंवह्निघटोभयपरतयाविवक्षितम्।यथाभूतलमिवपर्वतस्तद्वा
निति।तत्रवह्निपदजन्यबोधप्रकारीभूतंघटत्ववह्नित्वादिकमेवतत्पदजन्यबोधे
प्रकारः।सर्वनाम्नांबुद्धिस्थरूपेणतेनतेनैवप्रकारेणशक्तेः।ततोघटत्वादिप्रकार
कस्यैवबोधस्यउदयात्।तथाचतत्रानुगामित्वंनस्यादिति।एवंचेड्डस्वमुखंतद्द

स्थ

अ० कौ०
॥२०॥
20

दित्यादौ रमणीयत्वाह्लादकत्वोभयपरेऽपि। किं वा रमणीयत्वादावनुगामित्वाभावा
पत्तिरपि दुर्वारेति। तस्माद्वागर्थाविव संपृक्तावित्यादावनुगामित्वनिर्वचनं दुःक
रमिति पर्यवसितम्। उच्यते। धर्मवृत्तिसामान्योपस्थापकपदैक्य एवानुगामित्व
इति व्यवस्था। धर्मत्वं च तद्धर्मावच्छेदकतापर्याप्त्यधिकरणत्वं। अत एकोऽनेको वेत्य
त्रनादरः। तदितितत्पदृनिर्वाह्यो ऽर्थः। अतो बहूनां मिश्रणस्थलेनानुपपत्तिः। बिंब
प्रतिबिंबवारणाय एकेति सामान्यविशेषणादेयं। तत एव श्लेषस्यापि वारणं। ध
र्मश्च पर्यवसितः। चंद्रविरहितमित्यत्र पर्यवसितस्यैवोपादानं। संपृक्ताविसत्रत
दुत्तरपर्यवसानमिति तु विशेषः। एकेति वस्तुप्रतिवस्तुभावनिरासः। तत्र धर्मै

कोपिपदभेदात्। अतश्च सामान्येप्येकपदं श्लेषवारणायैव देयमिसलमतिपल्ल
वेन। क्वचिद्धि बिंबप्रतिबिंबभावेन धर्मोक्तिः। स च वस्तुतो भिन्नयोरपि सारूप्यादेक
त्वेऽध्यवसाने। यथा। उअणिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ वलाआ। णिम्म
लमरगअभाअणपरिट्ठिआ संखसुत्तिव्व। अत्र हि बिसिनीपत्रमरकतभाज
नयोरेकत्वेनाऽध्यवसानं। क्वचिदर्थगम्योपि बिंबप्रतिभावइतितन्व्याः। मलय
इव भाति पांडुर्वल्मीकूढवाधिपरणीध्वतराष्ट्रः। अत्र हि चंदनपांडुवादीनां स
र्पदुर्योधनादीनां च बिंबप्रतिबिंबभावो गम्यते इति। अयं चात्र विशेषः। उभयस
ध्ये प्रतिबिंबस्योपादाने धर्महानिर्दोषः। तत्र तत्स्थानीयधर्मानुक्तेः। बिंबमात्रोपा

बिंब

अ॰कौ॰
॥२१॥
21

दानेनतु उपमानेधर्माधिक्यं दोषः। उपमेयेतत्स्थानीयधर्मोनुक्तेरित्ययमस्फुटीभ
विष्यति। तस्माद्बिंबप्रतिबिंबभावापन्नयोर्द्वयोरवशाव.लंद्वयोरेववा आर्थत्वेका
र्यं। नत्वेकस्यशाब्दत्वमितितत्त्वम्। क्वचिद्वस्तुप्रतिवस्तुभावेन। स च प्रतियोगिभे
देनद्वे एकस्यैवधर्मस्यद्विरुपादानम्। स च भूद्वानसंभवत्येव। किंतु बिंबप्रति
बिंबभावविशेषणतयाविशेष्यतयावेतिद्विसिताः। तत्रविशेषणतयायथा॥
शर्वपर्वतमाश्लिष्टचंद्रिकश्चंद्रमाइव॥ अलंवक्रेसपर्यंकमंकसंक्रमितप्रियः॥ अ
त्रेमेमीचंद्रिकयाबिंबप्रतिबिंबभावः। आश्लिष्टांकसंक्रमितपदाभ्यांएकएवध
र्मोविशेषणतयाक्तः। विशेष्यतयायथा॥ संस्माराअत्यद् अंदीसहरगअंगम्प

गा
तो ऊ

इव आणंदेइ॥ रत्तदुकूलं तरिअं कूलाहलिाहा अणाववेंडेइ॥ अत्र संध्यारागर
क्तदुकूलयोर्बिंबप्रतिबिंबभावः। उत्स्थगितांतरितपदाभ्यामेक एव धर्मो विशे
ष्यते यत्र नः। संध्यारागरक्तदुकूलयोः स्थगितांतरितपदविशेषणीभूतत्वात्॥
यथा च॥ अज्जा उण्णीलकंचुअभरिउब्बुरिअं विहाइ थणवट्टं॥ जलभरिअजल
हरंतरदरुग्गअं चंदबिंबं व्व॥ इह नीलकंचुकजलधरयोर्बिंबप्रतिबिंबभावः। उ
ब्बुरितपदाभ्यामेक एव धर्मो विशेष्यते यानि दिष्टः। अन्यत्तु। विमलं वदनं तस्या
निःकलंकमृगांकतीत्यत्र शुद्धोपि वस्तुप्रतिवस्तुभावः संभवति। न ह्ययं बिंबप्रति
बिंबभावः। वैमल्यनिःकलंकत्वयोर्भेदाभावात्। न च सोदयोऽदिनैवात्रोपमासिद्धा॥

अ॰ को॰
॥२२॥
44

न तस्य धर्मतेति वाच्यं। यां त्वां मुहुरित्यादावपि तद्भावापत्तेरित्याहुः। क्वचि
द्बिंबप्रतिबिंबयोरन्यतरविशेषणस्य शाब्दत्वेऽन्यस्यार्थगम्यत्वमपि। यथा। श
रकांडपांडुगंडस्थलेयमाभाति परिमिताभरणा॥ माधवपरिणतिपत्रा कति
पयकुसुमेव कुंदलता॥ अत्र मालत्वैकांततयोरुपमायां गंडपत्रयोरलंका

बिंब

रकुसुमानां च बिंबप्रतिबिंबभावः। तत्र गंडांशे पांडुत्वं शब्दोपात्तं विशेषणमभि
नम्। पत्रांशे तु परिणतत्वगम्यं पांडुत्वं। समानत्वं यथा यमके यमाद्यैर्नत्वं विना

द्विव्य॰

सिद्धेतरत्वेः॥ भामांगणप्राघुणिकैर्वतुभिर्दैवद्रुमैर्धौरिव पाणिजातैः॥ अत्र स्व
र्गसंभवयोरुपमायां यमादिकल्पद्रुमादीनां नलपाणिजाततयाश्च बिंबप्रतिबिंब

भावः। तत्र च नलप्रतियोगिकाभाववत्त्वं समभायाभामांगणवृत्तित्वं च पारिजातस्य
विशेषणं दत्तं। तत्र च समभावृत्त्यभावप्रतियोगित्वं नलस्य। स्वर्गवृत्त्यभावप्रतियोगित्वं व
च पारिजातस्यार्थलभ्यं। एवं च स्वाधिकरणवृत्तिविजातीयशोभाविरहप्रयोजक
स्वाभावकत्वं उभयविशेषणं तया पर्यवस्यतीति। प्रथमस्य परस्वाभावपर इति संसे
पः। कुत्र चित् श्लेषेण। यथा। उत्कंटकाग्वलसदुज्वलपत्रराजिरम्भो [illegible]
पमेयत्वसंभवः। यथारूपरसयोर्घटद्वयवृत्त्योः तत्र साधारणधर्मावच्छेदकीभूतयोः
यत्वरसत्वयोर्मिथः सामानाधिकरण्याभावेपि अनुगामित्वमेव। यत्र तु पर्यवसितन सा
धारणयोनोपमानोपमेयोभयवृत्तित्वं। यथा संताने स्यत्र पारिजातस्य चंद्रवंशेपप्य

स्यस्य च नंदने ऽसत्वात्। तच्चनानुगामित्वेऽपि तु श्लेषएवेति चेत्। तत्तु (उम्) भागनपरागा
तरागेति गौरी। रुद्रकुधस्तरति काममधियानलसावासाथितामध्यतकांचनकेतकी
व॥ अत्रोत्कंठकादि विशेषणानि रमयंतीकेतकोः श्लिष्टानि। यथा वा मम। घनादिश
दारुणकरयासंपन्नपयोधरोदयया। प्रणयिन्या घनसमयश्रियेव चतुः समुन्नु
सिति॥ केचिदुपचारेण। यथा। अछीडुत्ता थइस्संसोहिं विहत्थेहिं तम्मि दिट्ठम्मि॥ अंग
कलंबकुसुमं व मउलिअं कहणु दीकुस्सं॥ इह मुकुलितत्वमंगे उपचरितम्। क्वापि
समासभेदेन यथा॥ विअसिअतमालणीलं पुणो पुणो चलतरंगकरपरिमट्ठम्॥ कु
वलआवलासरिच्छं उअहिंगइंदस्स दाणलेहं वपिअम॥ अत्र विकसिततमालनील

त्वंफुल्लुलावनसुरभितंचतृतीयासमासेनवेलायांउपमानानिसामान्यवचनैरिति
समासेनलेखायाम्। केचित्त्वपांद्वयोर्मिश्रणेन। तत्रानुगामित्वविंबप्रतिबिंबभाव
योर्मिश्रणं। यथा। अहंगमिअशिसासम अंगंभीरत्तणादहँअम्मिसमुद्दे॥ रोसोरा ८
हववहणंउप्पाॐवंदमंडलववविलग्गो॥ अत्रविलग्नत्वमनुगतं। राघववरनचंद्रम
डलयोर्बिंबप्रतिबिंबभावः। अनुगामित्ववस्तुप्रतिवस्तुभावयोर्यथा। वैवस्वतोमनु
र्नाममाननीयोमनीषिणां॥ आसीन्महीभृतामाद्यःप्रणवःछंदसामिव॥ अत्रमनु
प्रणवयोरुपमायांछंदसांमहीभृतांबिंबप्रतिबिंबभावापन्नानांआद्यत्वंविशेष्यत
योक्तं। मनीषिमान्यत्वमनुगतंअनुगामित्वश्लेषयोर्यथा। नाहूतापिपुरःपदंरच

अ. कौ.
॥२५॥
२५

पंतिप्राप्तोपकंठं हठात्स्थानप्रतिवस्तिकं पमृयते स्तंबै भंसमालंबते ॥ वैवर्ण्यं स्वरभंगमं
जतिवलान्मंदाक्षमंदाननाकंठभोः प्रतिभावृतोः व्याधिसभे वाली नवोढायते ॥ पृष्टे त्याद्
वनुगामित्वं पद्मिस्याद्श्लेषः ॥ अनुगामित्वोपचारयोर्यथा मम ॥ अतिसुकुमारः सोर
भाविशेषभरितोऽतिरमणीयः ॥ चुंबति कपोलबिंबं पुवेवकर्णावतंसोऽस्याः ॥ अत्रैकुमारत्वा सु
द्यनुगामि ॥ चुंबतीत्यवतंसे उपचारः ॥ अनुगामित्वसमासभेदयोर्यथा ॥ संरवोहि अकमल
सरोसंध्यां अवअंवथातुक्कइमि अमुहे ॥ ठाणाप्पुट्टि अनुगओरक्तिंभमे झलणपट्टिलि ऊ
प्रतोदिअसो ॥ अत्र संध्यातपेति समासभेदः ॥ संस्कोभितेत्याद्यनुगामि ॥ बिंबप्रतिबिंब
भाववस्तुप्रतिवस्तुभावयोर्यथा ॥ इअ णिअमिअ सुया वोरामंतेमैंण चलिउं पिआमहत २५

प

णाऊ। परिमट्ठमेरुसिहरोसरणाहिमुहोच्चपलउअधूमुप्पीडो॥ अत्र रामसूर्ययोर्बिंबप्रतिबिंब
भावापन्नयोरेकधर्मो तानिमुखशब्दाभ्यां निर्दिष्टः। मुखाबमेरुशिखरयोर्बिंबप्रतिबिंबभाव
श्चाश्लेषबिंबप्रतिबिंबभावयोर्यथामम॥ संप्रकाशितबलाहककृंदोभ्यंजयन्सालिकभाव
मनेहा॥ हेतुभावमुपलंभितसत्वोबोधिसत्वइवसत्वनमेति॥ अत्र वर्षोपसे। क्षालिकभाविद्यु
ता तस्या आवाहीप्तिः पक्षेक्षणिकभावः पदार्थानां प्रतिक्षणविनाशित्वमितिश्लेषः। मेघस
त्वयोर्बिंबप्रतिबिंबभावः। उभयोर्यथाक्रमं विद्युत्क्षणिकत्वसाधकत्वात्। उपचारबिंबप्रतिबिं
तार७ बभावयोर्यथामम। नितांतपारिप्लवतारकैरसनेत्सानत्तैयतिस्मलोचने॥ परिभ्रमद्भृंगभृंग
संततेनिशावसानेनलिनीवपंकजे॥ अत्र तारकाभृंगाणां नेत्रपंकजानां रसप्रभातत्वयोश्च
बिंबप्रतिबिंबभावः। नर्तनं नेत्रे पद्मे चोपचरितं। समासभेदश्लेषयोर्यथामम॥ खुड्डिउप्पति

अ॰ को॰
॥२५॥
25

अमुणालंदहुंणपिअंवसिढिवलवलअंणालिणिम॥महुअरिमहुहल्लावंमहुमअंवमुहंव
द्धेप्पङ्कमलेम्॥अत्रमधुकरीमधुरोल्लापमितिसमासभेदः॥मधुमदाताम्रमितिश्लेषः॥६॥
समासभेदबिंबप्रतिबिंबभावयोर्यथा॥वणदवमसिमइलंगोनेहदविंझोघणोहिधवलेहि
म॥क्षीरदमंथणुच्छलिअदुसिताच्चमहुमहणो॥अत्रवनदवेत्यत्रसमासभेदः॥धवलघन
दुग्धपोबिंबप्रतिबिंबभावः॥वस्तुप्रतिवस्तुभावश्लेषयोर्यथाममम्॥सुरसतरहसितमुखी
विभातिवरवर्णिनीनितरां॥उन्मीलिताऽरविंदासरसीवविनिर्गतालिकुलेति॥अत्रबिंबप्र
तिबिंबभावापन्नयोर्मुखारविंदयोरेकएवधर्मोहसितोन्मीलितपदाभ्यांविशेषणतया
निर्दिष्टः॥प्रथमांतविशेषणात्रयेश्लेषः॥२॥समासभेदोपचारयोर्यथाममा॥मालतीमुकुल
कोमलदंतामत्तबर्हिकुलकेशकलापा॥जीवयत्यसमसायकमेषाकामिनीवजलदागम

लक्ष्मीः॥ अत्र मालतीत्यादौ समासभेदः। जीवयन्तीत्युपचारः। ५। समासरूपभेदे वस्तुप्रतिवस्तु
भावयोर्यथा मम॥ घनप्रसवसंकुलास्थगितशर्वरीवल्लभा विराजति बलाहकागमनका
लिके द्यौरियम्॥ परं विहतगोचरीभवनपुण्डरीकच्छटा तमालदलमेचकावयवसन्निवेशो
बभूः। अत्र घनप्रसवेत्यादौ [illegible] तमालेत्यादौ च समासभेदः। चन्द्रपुण्डरीकयोर्बिम्बप्र
तिबिम्बभावापन्नयोः स्थगितत्वं विहतगोचरीभवनत्वं चैक एव धर्म उक्तः॥ श्लेषोपचारयो
र्यथा॥ अस्थानगामिभिरलं कुररोरुपेताभूयः पदस्खलननिह्नुतिरप्रसन्ना॥ वारुणीत्वका
पि कुकवेर्मधुपानमत्ता गेहान्निपातनवहूलेव विनिर्जगाम॥ निर्गमस्य वारुण्यामुपचारः। अ
न्यत्र श्लेषः। ३। केचित्श्लेषात्रयाणां मिश्रणेन। तत्र समासभेदानुगामि श्लेषोपचाराणां यथा॥
मुहलघणाविप्पइण्णजललविवहंभरिअसभलणहमहीविवंभरम॥ णाइमुहपङ्कअंथंतं अप्पा

णाविणाणा अंजसंववि अंतमम्॥ अत्रमुखरेत्यत्रसमासभेदः। भूतनमोमहीविवरत्वं
अनुगामिविनिर्गतमित्यस्ययस्यशस्युपचारः। अनुगामित्वश्लेषोपचाराणांयथा।
उद्दामोत्कलिकांविपांडुरहचंप्रारब्धजंभांसणाशयासंश्वासितोद्गमैर्विरलैरातन्वती
मात्मनः॥ अद्योद्यानलतामिमांसमरनानारीमिवान्यांध्रुवंपश्यत्कोपविपाटलद्यु
तिमुखंदेव्याःकरिष्याम्यहं॥ अत्रोत्कलिकेतिश्लेषः। विपांडुरेत्यत्रआयासेत्यत्रचानुगा
मित्व। प्रारब्धजंभामितिलतायामुपचारः। उपचारसमासभेदश्लेषाणांयथा॥ सर
एसरम्मिपहिआजलाइंकेराइसुरहिगंधाइं॥ धवलच्छाइसअह्लापिअंतिदइआ
णावमुहाइम॥ अत्रपिबंतीतिमुखपक्षेउपचारः। नीलोत्पलसुरभीतिसमासभेदः। ध
वलाक्षाणिधवलाक्षाणीत्यर्थकतयाधवलच्छाइइत्यत्रश्लेषः। अनुगामित्वबिंबप्र

तिबिंबभावावसमासभेदानांयथाममा॥ स्फुटपंकजानयनेनसास्वच्छमुखीममनःप्रसा
दयति॥ कुमुदाकरंशारदेवाभिनवोदितशीतकरबिंबा॥ अत्रप्रसादयतीत्यनुगामी॥
मुखचंद्रयोर्बिंबप्रतिबिंबभावः। स्फुटनयनेतिसमासभेदः। अतःपरंममैवतद्विषयश्लो
कः। अनुगामित्वसमासभेदश्लेषाणांयथा॥ तारामुक्ताहारासमुदंचितचंद्ररुचिव
र्चा॥ विकसितकैरवहासाज्योत्स्नाविवधज्वरंविधुनोति॥ अत्रज्वरंविधुनोतीत्यनुगामी।
तारस्याराविकसतीत्यादौचसमासभेदः। चंद्रेतिश्लेषः। उपचारबिंबप्रतिबिंबभावस
मासभेदानांयथा॥ विजृंभमाणोन्नतकोरकस्तनीसरोजिनींचुंबतिवासरेश्वरः॥ स
मुल्लसत्कुंकुमपंकलोहितोयुवानचीनांबरवर्णिनीमिव। अत्रविजृंभमाणेत्यत्रसमु
ल्लसदित्यत्रचसमासभेदः। सरोजिनीवरवर्णिन्योर्बिंबप्रतिबिंबभावः। चुम्बतीतिरविप

षेउपचारः। उपचारविंबप्रतिविंबभावश्लेषाणां यथा॥ रसभरसार्द्रावयवः परिरंभते के-
तकीपवनः॥ कठिनतरकंटकोल्लकंचुकिनां कामिनीमिवसकामः॥ अत्र पवनपक्षेपरिरं-
भोपचारः। केतकीकामिन्योर्विंबप्रतिविंबभावः। रसकंटकपदयोः श्लेषः। अनुगामित्वविं-
बप्रतिविंबोपचाराणां यथा॥ मरुद्गृहीतामलमालतीकः सीमंतयत्येवतमालवल्लीं॥
प्राणेश्वरो जीवितवल्लभायाः श्लथालकांतीश्व[?]णिमिवालकानाम्॥ अत्र गृहीतेत्यादिरनु-
गामी। तमालालकानां विंबप्रतिविंबभावः। मरुति सीमंतयोकर्तृत्वोपचारः। अनुगामि-
त्वविंबप्रतिविंबभावसमासभेदानां यथा॥ तरलयति मानसेमेकुमुदमनोज्ञास्मितश्री-
स्ते॥ नाथेंदीपवतीनां ज्योत्स्नेव मनोजचापभृत्॥ अत्र तरलयतीत्यनुगामी॥ मानससमु-
द्रयोर्विंबप्रतिविंबभावः। कुमुदमनोज्ञेतिसमासभेदः। वस्तुप्रतिवस्तुभावसमासभे

रेफ्वारणांयथा॥कुटिलगतासरसीरुहसुकुमारकरासुधांशुमुखा॥वक्रतरंगाकु
लितासरिद्दिवसानंद्रवगाह्या॥अत्रगततरंगयोर्बिंबप्रतिबिंबभावापन्नयोःकुटिलगे
वक्रत्वाभ्यामेकधर्मउक्तः।सरसीरुहेतिसमासभेदः।अवगाहनस्यकामिन्यामुपचारः।
वस्तुप्रतिवस्तुभावसमासभेदश्लेषाणांयथा॥समीरणोदंचितिकिंचिदेवस्तनंरधाना
सुमृणालबाहुका॥गुलुच्छमभ्युच्छ्रितकंपल्लवंसरोजिनीवासितनाविस्तारभमा।अत्र
बिंबप्रतिबिंबभावापन्नयोस्तनगुलुच्छयोरुदंचितोच्छ्रितत्वेएकधर्मनिर्देशः।सुमृणा
लेतिसमासभेदः।सौरभेतिश्लेषः।वस्तुप्रतिवस्तुभावसमासभेदानुगामित्वानांयथा॥
दरस्फुरितकोमलाधरदलामनागास्सलालसलोकविषयीभवद्विशदमुग्धदंतांकुरभूः।परि
ष्वितपल्लवाकिमपिदृश्यसत्कोरकालतेवहरतिप्रियाकिसलयाग्रहस्तामनः॥अत्रबिं

अ.कौ.
॥२८॥
28

बप्रतिबिंबभावापन्नानांअधरपल्लवानांदंतकुड्मलानांचस्फुरितत्वपरिम्लवत्वेइत्स्मलावि
षयीभवनेदृश्यत्वेचपृथगुपात्तेहरणमनुगामी॥ किसलयतिसमासभेदः। वस्तुप्रतिव
स्तुभावश्लेषानुगामित्वानांयथा॥ घनसारसारविशदांकंटकितांसालतनुंधत्ते॥ पुष्पा
लीमिवकेतकवल्लीधूलीसितांमङ्गी॥ अत्रबिंबप्रतिबिंबभावापन्नयोर्घनसारधूल्यो
विंशदसितत्वरूपएकएवधर्मउक्तः। कंटकेतिश्लेषःस्फुटीत्यनुगामी॥ वस्तुप्रतिवस्तुभा
वानुगामित्वोपचारस्तणांयथा॥ मोहयंतिपिहितवदनोबालायाएषकुंतलकलापः॥
प्रावृषइवांबुवाहःछन्नविधुर्वान्ध्यवस्तमसः॥ अत्रबिंबप्रतिबिंबभावापन्नयोर्मुखचंद्र
योःपिहितत्वछन्नत्वरूपएकएवधर्मउक्तः। मोहयतीत्यनुगामी॥ बांधवेत्युपचारः। एवमन्य
प्रकाराःस्वयमुह्याःसुलभत्वादुपेक्षिताइतिदिक्॥ ॥अयंचात्रविशेषः॥ धर्मस्यानुगा

मित्वे पदार्थे तावच्छेदकरूपेणोपस्थितो सत्यां तद्रूपेणोपमानोपमेययोस्तद्बोधः प्रसि
द्ध एव। बिंबप्रतिबिंबभावस्थले तु मरकतभाजनवृत्तिशंखशुक्तिप्रतियोगिकसादृश्या
प श्रयो बलाका बिसिनीवृत्तिरितिशाब्दबोधः। तदाधारतापन्नयोश्च भाजनपात्रयोर्भे
देसति तद्वृत्तित्वेन धर्मेण तत्सादृश्याभावेन मरकतभाजनबिसिनीपत्रयोरभेदारोपले
क्यपर्यवसाने तन्निमित्तकसादृश्यज्ञानं मानसमेव। न च श्वैत्येनैव तत्सादृश्यसिद्धिरिति
वाच्यं तदा शंखशुक्तौ मरकतभाजनवृत्तित्वविशेषणवैयर्थ्यापत्तेः। सादृश्यघटकाति
रिक्तोपमानविशेषणोपादानस्यैव वैयर्थ्यात्। एकधर्मघटितसादृश्यापेक्षया बहुधर्म
ला घटितस्य तस्य चमत्कारातिशयजनकत्वात्। अत एवापांस्यामुद्वल्लितकुं धरमाननं तदु
द्वृत्तं शतपत्रनिभं वहंत्याः स्निग्धोम्लानं च विषणं च पक्ष्मलाक्ष्याः गाढं निखातमिव मे हृ

अ.कौ.
॥२९॥
29

दयैकराक्षः इत्यादावपि वस्तुप्रतिवस्तुभावस्थले निर्वाहः। अन्यथा सौन्दर्येणेव धर्मेण सा
म्यानिःपत्तौ कंधराधृतयोरैक्यारोपेण साधारण्यानुपपत्तेः। अयं च विशेषः। उत्खा
तमिव शैलमित्यत्र शैलसमुद्रयोर्धर्मान्तरप्रयोज्यचमत्कारकसादृश्यस्याप्रसिद्ध्या
उत्खातद्रुमत्वस्य सादृश्यप्रयोजकत्वानुसंधानं विना न प्रतीतिपर्यवसानं। यांत्या सु
हृदित्यादौ तु कंधराधृतादीनां ऐक्यबाधाभावेपि सौन्दर्यादिना सादृश्यधीपर्यवसानं भ
कं वत्येव। परंतु धराधृतादीनामभेदबुद्धेः सादृश्यज्ञाने उत्कर्ष[illegible]कत्वमात्रमिति। एवं बिं
बप्रतिबिंबभावस्थलेपि यत्र बिंबप्रतिबिंबभावापन्नधर्मव्यतिरेकेण सादृश्यमप्रसिद्धं त
त्रापि बोध्यं। यथा। कोमलातपबालाभ्रसंध्याकालसहोदरः। कुंकुमालेपनो भाति कषाय
वसनो यतिरित्यादौ। न ह्यत्र धर्मान्तरेण यतिसंध्याकालयोः सादृश्यं प्रसिद्धं। अपि त्वभेदा

व्यवसायविषयीभूतकोमलातपकुंकुमादिधर्मेलावेति। एवं श्लेषेपि। नरसिंहमहीपाल
सर्वोप्यरिगणास्तव॥ पारावारसमानत्वं दधाति स्वपदच्युतः इत्यत्र वैरिसमुद्रयोः स्वपद
च्युतत्वधर्मनिमित्तकमेव सादृश्यं। एवमुपचारेपि। शतकोटिकठिनचित्तः सोहं तस्याः स
धेकमयमूर्त्तेः॥ येनाकारिषि मित्रं सविकलहृदयो विधिर्वाच्यः। अत्र काठिन्यस्य पार्थिवगु
णत्वेन चित्ते उपचारः। दयाविरहकत्वात्। ततश्च दयाविरहकाठिन्याऽभेदाऽध्यवसायेन कु
लिशचित्तयोः सादृश्यसिद्धिः। अन्यनिमित्तकसादृश्याऽप्रसिद्धेः। तस्मात्कश्चिद्धर्मः सादृ
श्यस्वरूपनिर्वाहकोऽन्यस्तु तदुत्कर्षक इति सिद्धं। तां द्विधा विभजते। श्रौत्यार्थी सा द्विविधा
वाक्यवृत्तेश्च तद्धितेन तद्वत्॥ चंद्र इव मुखमित्यत्र शाब्दबोधतावत्केचिदाहुः। यद्यपि यथा इवा
दिशब्दानां तुल्यादिपदानां च सादृश्यबोधकत्वाऽविशेषात् श्रौतार्थत्वविभागानुपपत्तिः। न

अ॰को॰ ।।३०।।

30

चन्द्रत्वादिभिरुभयत्रधर्मसंबंधःशक्यःप्रत्याय्यते।तुल्यादिभिस्तुधर्ममात्रमितिविशेषइति
वाच्यं।इवादीनामुपमानविशेषणत्वनियमेनतैरप्युपमानएवसाधारणधर्मसंबंधोबो
धयितुंशक्यतेनतूपमेयेपि।अन्यविशेषणस्यान्यत्रसंबंधबोधकत्वाभावात्।तथापिय
थाचैत्रधनमित्यत्रचैत्रपदोत्तरषष्ठ्याचैत्रस्यस्वामित्वंधनस्यचस्वत्वंबोध्यतेशब्दशक्तिस्वा
भाव्यात्तथात्रापीवपदेनउभयत्रतद्बोधनात्तन्नानुपपत्तिः।नन्वेवमपिकथमुपमानोपमेय
योर्भेदान्वयइतिवाच्यं।प्रकारीभूतविभक्त्यर्थसंबंधस्यैवफलानुरोधात्तन्नामार्थयोर्भेदा
न्वयेप्रकारीभूतनिपातार्थसंबंधस्यापिहेतुत्वकल्पनात्तस्मात्सहृदयचन्द्रीयंमुखमितिशा
ब्दबोधः।चैत्रस्येदंधनमित्यत्रस्वामिचैत्रीयंधनमितिवत्।अतएवश्रौतीत्वंसादृश्यप्रतीतियो
गितास्यसोपमानत्वस्यइवपदेनबोधनादिति।।अत्रकेचिदाहुः।मीमांसकमतमभिसंधा

२०:

३०

पेवात्रसमाधानं। तथाहि॥ चंद्रप्रतियोगिकसादृश्यमेवइवपदार्थः। घटोनेत्यत्रघटप्रति
ना योगिकाभावस्यनञर्थवत्। नचसादृश्यमात्रमिवादेरर्थंइतिवाच्यं। चंद्रस्यसादृश्यमि
त्यादिवत्। चंद्रस्येवमुखमित्यादेरप्यापत्तेः। घटस्याभावइतिवत्घटस्यनेत्यादेरप्याप
त्तेः। इवपदस्यसादृश्यमात्रवाचकतयाततःषष्ठ्यर्थसंबंधालाभेनतद्बोधार्थंषष्ठीप्रयो
गस्यावश्यकत्वात्। प्रसज्ज्यहीत्यादुसादृश्यप्रतियोगितायाएवइवादिपदवाच्यतयाषष्ठ्य
नपेक्षणात्। नचाव्ययस्थलेविलक्षणव्युत्पत्तिबलान्नषष्ठीतिवाच्यं। तथासतितस्यवगो
रवस्यापत्तेः। अतोव्ययस्थलेन्विताभिधानंनतुतुल्यादिपदानामपीति। तन्न। असमस्तन
ञोऽभावमात्रपरत्वेनप्रतियोगितांशस्यसंसर्गमर्यादयाभानसंभवात्। नचघटस्यनेति
षष्ठ्यापत्तिः। नञपदजन्याभावोपस्थितौप्रतियोगितांशस्यसंसर्गतयैवभानंअभावपर

जन्यायांतुप्रकारतयैवेतिनियमाभ्युपगमात्। नचगौरवं। तवापिघटोनेत्यत्रघटाभावाभा
ववारणायसमभिव्याहृतपदार्थप्रतियोगिकएवाभावोभासतइतिनियमस्याभ्युपगम्य
तयातदपेक्ष्याभावमात्रेनञर्थः प्रतियोगित्वंसंसर्गतयाभासतइत्यस्यैवयुक्तत्वात्। घट
पदस्यैवघट[illegible]प्रतियोगिकाभावपरत्वंनञ्पदंतात्पर्यग्राहकमित्यस्यापिसुवचत्वाच्च।
अन्वितांभावबोधत्वमपेक्ष्याऽभावत्वप्रकारकबोधत्वस्यैवलाघवेतैनञ्पदज्ञानकार्य
तावच्छेदकत्वात्। एवंचप्रतियोगितांशस्यसंसर्गतयाभानसंभवेनतत्रनञादेःशक्तिरन्य
लभ्यत्वात्। नचघटोऽभावइत्यत्रापितथाभानसंभवेषष्ठ्युपसानस्यादितिवाच्यं। समा
नविभक्तिकनामार्थयोरभेदान्वयस्यैवाकांक्षितत्वेनतत्रघटस्यप्रतियोगित्वेनाभावान्व
यासंभवात्। अन्यथाऽभावपदस्यापिघटप्रतियोगिकाभाववाचकत्वसंभवेनतवापित

त्र षष्ठीप्रयोगस्य दुस्समाधानत्वात्। न च निपातस्थल एवान्विताभिधानमिति वाच्यं। त्व
याऽन्विताभिधाननियामकत्वं परस्य वक्तव्यं तस्यैव मया षष्ठीप्रयोगानियामकतायां वक्तव्यत्वा
त्। तद्धेतोरेवेति न्यायात्। तस्माच्चंद्र इवेत्यादौ प्रतियोगित्वस्य संसर्गतया बोधान्न षष्ठी।
चंद्रस्य सादृश्यमित्यत्र तु संसर्गतया तद्बोधासंभवात् षष्ठी। स्यस्य सुस्थत्वयान चंद्रप्रतियोगि
कसादृश्यस्येव वाद्येनैव घटप्रतियोगिकाभावेन आदेः शक्तिरिति सिद्धं। तस्मान्निपातातिरि
क्तनामार्थयोर्भेदान्वयबोध एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तंत्रत्वमिति नैयायिकाः।।
केचित्तु इवस्थले तथा बोधसंभवेपि यथा चंद्रस्तथा मुखमित्यादौ न तदुपपत्तिः। तत्र यथा
दृशधर्मवांश्चंद्रस्तादृशधर्मवन्मुखमित्युपमानोपमेयोभयविशेष्यकबोधात्। तेन चंद्र
इव मुखमित्यत्राप्युभयविशेष्यक एवो बोधः। अत एव हंसीव धवलश्चंद्र इति लुप्तोपमात

क

बोधे

त्रापियाहृदयधावल्यवतीहंसीलाहृदयधावल्यवानचंद्र इतियौयेपुलिंगधवलपदस्यद्र
स्यामन्वयासंभवात्। अतएकवचःश्रोत्रीलंह्रयोरकविभक्तिकत्वेनउभयत्रसाधारणधर्म
संबंधस्यशाब्दत्वात्। चंद्रेणतुल्यंमुखंमनोहरमित्यादौतुविभक्तिसाम्येपिउपमानोप
मेयभावस्यप्रसिद्धिवशादेवलाभइत्यार्थत्वमित्याहुः। [illegible]। चंद्रइवमुखंरमणीयमित्य
त्राप्युपमायादुष्टत्वप्रसंगात्। तत्राप्युपमानोपमेययोर्भिन्नलिंगतयामनोज्ञत्वस्य
मुखान्वितस्यचंद्रेन्वयासंभवात्। यत्तुतत्ररमणीयंचरमणीयश्चेतिद्वंद्वेनपुंसकमनपुं
सकेनेत्येकशेषएकवद्भावेचनपुंलिंगरमणीयपदस्यचं [illegible] मुखेन्वयान्नदोषइति।
तन्नतुच्छं। कुवलयमिवश्यामःकटाक्षःध्वांतमिवकेशानीलइत्यादौदुष्टोपमात्वप्रसंगस्य
तथापिदुर्वारत्वात्। नचतत्रदुष्टत्वमेवेतिवाच्यंमानाभावात्। इष्टःपुन्नपुंसकयोःप्रायेण

द्रेनपुंसकस्यच३

तिवाममनोक्तेरुभयत्रसाम्यात्। प्राणादिवप्रियोयंमेविद्याधनमिवार्जितेत्यस्यापिदृष्टि

नाअदोषत्वेनांगीकृतस्यदुष्टत्वप्रसंगाच्च। अत्रेदंतत्वं। तद्भिन्नत्वेसतितद्गतभूयोधर्मवत्वं

हिसादृश्यं। तत्रतद्भिन्नवृत्तित्वेसतितद्वृत्तित्वमात्रंइवार्थ। तद्गतेत्यत्रवृत्तित्वस्यधर्मवत्वमित्यत्राधिकरणत्व

स्यचनिवेशेणापेक्षयोभयत्रवृत्तित्वनिवेशस्यैवयुक्तत्वात्। तद्भिन्नत्वनिवेशस्तूभयत्रसमानः। नचतद्भिन्न

वृत्तित्वस्यतत्प्रतियोगिकान्योन्याभावाधिकरणवृत्तित्वरूपस्यनिवेशेतद्वैयाप्यधिकरणत्वनिवेशइ वी

तिवाच्यं। तद्भिन्नत्वेसतीतिभेदनिरूपिताधिकरणत्वस्यापिनिवेशसाम्यात्। नचतद्भिन्नत्वेसतीत्यत्र

तदन्योन्याभावधर्मयोःसामानाधिकरण्यंसंबंधः। तच्चविशेषणतासमवायादिघटितं। तेनभेदधर्म एव

प्रकारः। तथतत्कसंबंधघटितसामानाधिकरण्यस्यैवप्रकारतयातत्रैवतन्निवेशः। परंचवृत्तित्वस्यस्व रं

रूपात्मकसंबंधेनवृत्तित्वेपिवैशिष्ट्यमितिमरुद्गौरवमितिवाच्यं। तथापिधर्मेतद्वृत्तित्वविशेषणत्वेसत्वे स्यै

नतत्रसमवायादिनिवेशाल्लाघवानवकाशात्।नचमन्मतेसंसर्गीभूतसामानाधिकरण्यघटकत्वेनविशेष
णविशेषसमवायाद्योःतद्वृत्तित्वेन्यत्रचसमवायादेःप्रवेशः।तवतुप्रकारीभूतसामानाधिकरण्यघटक
त्वेनविशेषणताविशेषसमवायाद्योर्वृत्तित्ववैशिष्ट्यघटकत्वेनचस्वरूपेनिवेशः।धर्मेतद्वैशिष्ट्यघट
कत्वेनापिस्वरू॰ पस्यनिवेशइतिगौरवमितिवाच्यं।धर्मवत्वेत्यत्रसमवायसंसर्गतायाअवच्छ
मतेसत्वात्।नचधर्मस्योपमेयवैशिष्ट्येसमवायादिकंसंबंधस्त्वयापिवाच्यएवेतिवाच्यं।इवार्थए
वार्थेलाघवगौरवयोर्विचार्यत्वात्।किंच।तद्भिन्नवृत्तित्वेसतितद्वृत्तिधर्मेइवपदस्यशक्तिकल्पनेचेद
निष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपितभेदनिष्ठविशेष्यताख्यप्र
कारतानिरूपितविशेषणताविशेषनिष्ठसांसर्गिकविषयतानिरूपिताधिकरणनिष्ठविशेष्यताख्य
प्रकारतानिरूपितस्वनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनिष्ठविशेष्यताख्यप्रकारतानिरूपि

ता त्वेवृत्ति

स स्त्वन

33

रूपि

तायाःस्वरूपनिष्ठसांसर्गिकविषयतानिरूपितार्थत्वंद्वनिष्ठप्रकारतानिरूपितसमवायादिनिष्ठसां
सर्गिकविषयतानिरूपितवृत्तित्वनिष्ठविशेष्यताख्यप्रकारतातन्निरूपितस्वरूपनिष्ठसांसर्गिकविष
यतानिरूपितधर्मनिष्ठप्रकारताशालिज्ञानत्वंइष्टपदशक्तिज्ञानस्यकार्यतावच्छेदकंकल्प्यं।तद्भिन्नत्वस
तितद्धतधर्मवत्त्वेशक्तिकल्पनेतुत्वंद्वनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानि
रूपितभेदनिष्ठप्रकारतानिरूपितायाविशेषणताविशेषनिष्ठसांसर्गिकविषयतानिरूपिताधिकर
णनिष्ठसांसर्गिकविषयतानिरूपितसमवायनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनिष्ठसां
सर्गिकविषयतानिरूपितात्वंद्वनिष्ठप्रकारतानिरूपितसमवायनिष्ठसांसर्गिकविषयतानिरूपित
वृत्तित्वनि~~रूपितसमवा~~ष्ठविशेष्यताख्यप्रकारतानिरूपितस्वरूपनिष्ठसांसर्गिकविषयतानिरूपि
तधर्मनिष्ठविशेष्यताख्यप्रकारतातन्निरूपितसमवायनिष्ठसांसर्गिकविषयतानिरूपिताधिकर

अ.का.को.

॥३५॥

३५

णामिक्षुविशेष्यताख्यप्रकारताशालिज्ञानत्वं तत्कार्यतावच्छेदकं कल्पनीयं। धर्मवत्त्वमित्यत्र च धर्मैव
दितावृत्तित्वादिघटितधर्मैकत्वत्वेन धर्मवत्त्वज्ञानं तद्घटकवैशिष्ट्यादीनां शक्तिज्ञानविषयत्वं चाधि
कं कल्पनीयं। मन्मते तु धर्मस्यैव विशेष्यतया तत्र धर्मत्वस्य स्वरूपेणैव प्रकारत्वमिति न तद्घटकानां
ज्ञानविषयत्वकल्पनमिति लाघवं। किंच। प्रथमपक्षे रमणीयत्वादिधर्मस्यणाद्वत्वे तत्राभेदेन धर्मा
न्वयसंभवो न तु द्वितीये इति तस्माद्विशेष्यशक्तिपक्षे धर्म एव शक्तिकल्पनमुचितं। इदं चात्र पक्षद्वये
तुल्यं विभाव्यं। अस्मादिपदवदिवशब्दस्य नानार्थत्वैव। तत्तच्छब्दसमभिव्याहारस्य नियामकत्वान्न त

तथा

थाबाधः। येन संबंधेन धर्मस्योपमानोपमेयवृत्तित्वं तत्र तस्यैव संसर्गत्वं। यत्र चोपमाने न्यसंबंधेन उप
मेये च संबंधांतरेण धर्मस्य वृत्तित्वं। यथा वागर्थाविव संपृक्तावित्यत्र वागर्थयोर्वाच्यवाचकभावस्य स्व
रूपेण वृत्तित्वं पार्वतीपरमेश्वरयोस्तु संयोगस्य समवायेन तत्र तत्तत्प्रकारतायां तस्य तस्य संसर्गत्वं। न

॥३५॥

चैवं चंद्रादिपदवैयर्थ्यापत्तिः। तात्पर्यग्राहकत्वेन तदुपयोगात्। त्वप्रत्ययादीनां विशिष्टशक्तिमते घटादिपद
वत्। चंद्रइव चंद्र इत्यादौ भिन्नशक्तिकल्पनाद्विलक्षणो बोध इति दिक्॥ अथ भेदस्तद्गतधर्मश्चेवार्थः। चंद्र
त्वावच्छिन्नप्रतियोगितासंबंधेन चंद्रादेर्भेदेऽन्वयः। तस्य च विशेषणतानाविशेषसंबंधेन मुखादौ धर्मस्य च
समवायादिना मुख एव। तथा च चंद्रभिन्नं मुखं चंद्रगतधर्मवदिति बोध इति चेत्। मैवं। तथा हि। किमत्र वि
शिष्टवैशिष्ट्यमिति रीत्या बोधः। उतैकत्र द्वयमिति। नाद्यः। चंद्रभेदविशिष्टमुखे चंद्रगतधर्मवैशिष्ट्यभानस्य
चंद्रभेदं धर्मितावच्छेदकीकृत्य चंद्रगतधर्मप्रकारकज्ञानरूपतया मुखत्वधर्मितावच्छेदक. कचंद्रभेदप्रकार
कावांतरवाक्यार्थज्ञानस्य एवमभ्युपगम्यतया गौरवात्। मुखत्वावच्छिन्नैकैन विशेष्यताकचंद्रभेदप्रकार
कज्ञानरूप विशेष्यतावच्छेदकप्रकारकज्ञानस्यावांतरवाक्यार्थज्ञानपदेवमपि योग्यताज्ञानविधयाऽपे
क्षणीयत्वाच्च। चंद्रभेदावच्छिन्नमुखनिष्ठविशेष्यताकचंद्रगतधर्मप्रकारकयोग्यताज्ञानस्य महावा

क्यार्थबोधहेतुतयाप्यपेक्षणीयत्वाच्च। तेन सार्थधर्मितावच्छेदकीकृत्यान्यपदार्थविशेष्यकतत्पदार्थ
प्रकारकशाब्दज्ञानस्याप्रसिद्धत्वाच्च। चंद्रभिन्नवृत्तित्वविशिष्टोयश्चंद्रवृत्तिधर्मस्तद्वदित्यस्मात्संमतेबो
धेतु चंद्रभिन्नवृत्तित्वविशिष्टचंद्रवृत्तिधर्मस्यमुखेवैशिष्ट्यं विषयः। तत्र च चंद्रभिन्नवृत्तित्वविशिष्टश्चं
द्रवृत्तिधर्मइतिविशेषणतावच्छेदकप्रकारकज्ञानमवान्तरवाक्यार्थयोग्यताज्ञानविधयापेक्षितं।
स्य अथवामुखेचंद्रवृत्तिधर्मस्यतत्र च चंद्रभिन्नवृत्तित्ववैशिष्ट्यमिति विशेष्ये विशेषणं तत्र च विशे
षणांतरमिति न्यायेनैव बोधः। तथा च चंद्र इव मुखमिति शाब्दबोधसामग्र्या मुखं न चंद्र इवेति बा
क्रषादिकंप्रति प्रतिबंधकत्वे कल्पनीये भवतामुखं न चंद्रभिन्नमित्यादिबाधाभावनिवेशनं कार्यं। मुख
त्वावच्छिन्नविशेष्यताकचंद्रभेदाभावप्रकारकनिर्णयस्यमुखत्वावच्छिन्नविशेष्यताकचंद्रभेदप्रकारक
ज्ञानप्रतिबंधकतयातदानीं मुखं चंद्रभिन्नमिति विशेष[illegible]णतावच्छेदकप्रकारकज्ञानाभावेनशाब्दबो

धानुदयात्। मन्मते तु कलौ धस्य चंद्रभेदांशे निर्दिष्टमितावच्छेदकत्वेन मुखत्वावच्छिन्नविशेष्यताकचंद्रभेदाभाव
प्रकारकनिर्णयप्रतिबध्यतावच्छेदकानाक्रांततया तादृशशाब्दबोधोत्पत्तौ बाधकाभावेन मुखत्वे भावनि ६२
वेशने प्रयोजनाभावात्। न च चंद्रवृत्तिधर्मो न चंद्रान्यवृत्तिरिति बाधाभावस्तथापि सामग्रीप्रतिबंधकता
यां निवेशनीय इति वाच्यं। तन्निवेशस्य तथाप्यावश्यकत्वात्। तादृशज्ञानसत्वे मुखं चंद्रगतधर्मवदिति शा
नस्याप्यनुत्पत्तेः। चंद्रान्यवृत्तित्वावच्छिन्नाभावस्य तद्विषयत्वात्। वस्तुतस्त्वीदृशं प्रतिबंधकमेव नास्ति। द्र
व्यत्वादेश्चंद्रतद्भिन्नोभयवृत्तित्वात्। तन्मात्रगर्भे चंद्रग्राह्याभावानवगाहितयैव न तथा न हि मुखे चंद्रगतध
र्माभिन्नधर्मो ग्राह्योपि तु तत्सजातीय इति। तादृशाभावानवगाहिन एव तर्हि निवेश आवश्यक इति चेत्। त
थापि तुल्यमिति दत्तोत्तरत्वात्। एवं मुखं न चंद्रगतधर्मवदिति बाधाभावोप्युभाभ्यामेव निवेशनीय इति। ७८
न च मुखं न चंद्रभिन्नमिति मानसं प्रति चंद्र इव मुखमिति शाब्दबोधसामग्र्याः प्रतिबंधकत्वाकल्पनेन ममम

तेलाघवं। तत्कालेविशेष्यतावच्छेदकप्रकारकनिर्णयविधयामुखंचंद्रभिन्नमितिनिर्णयस्यावश्यकतया
ततएवमानसवारणादिति वाच्यं। चंद्रान्यवृत्तिधर्मेणचंद्रवृत्तित्वेतिमानसंप्रतितादृशसामग्र्याःप्रति
बंधकत्वाकल्पनेप्रयुक्तलाघवस्यममापिसत्वात्। सामग्रीप्रतिबंधकतायांतादृशाभावनिवेशापेक्ष
यासामग्रीप्रतिबंधकत्वकल्पनेपिलाघवसंभवाच्च। नापिद्वितीयः। चंद्रगतधर्मस्यविधेयत्वप्रतीतिवच्चं
द्रभेदस्यापिमुखेविधेयत्वेनप्रतीत्यापत्तेः। नचेष्टापत्तिरनुभवविसंवादात्। अतएवमुखचंद्रगतधर्मवन्न
वेतिसंशयेस्येवद्रतोनिवृत्तिर्नतुचंद्रभिन्नंनवेत्यस्येति। ममतुविशेष्येविशेषणमितिन्यायेनमुखेधर्म
स्यतत्रचंद्रभिन्नवृत्तित्वस्यभानाभ्युपगमेपिमुखेधर्मस्यैवविशेषणतयामुखादृश्यकधर्मविधेयकप्र
तीतिनिर्वाहान्नानुपपत्तिलेशोपि। तथाचभिन्नेवृत्तित्वेधर्मेचस्वपरस्यशक्तिः। त्वयापिशक्तित्रयस्यो
क्तविषयेष्वेवकल्प्यत्वात्। नचममभेदेशक्तिस्त्वतुतद्वृत्तीतिवाच्यं। भेदवत्यप्येकस्याएवशक्तेःकल्प्यत्वा

त्। न च मम भेदत्वं शक्यतावच्छेदकं तद्वत्तु भेद इति वाच्यं। तस्यापि भेदघटितत्वात्। तत्र च प्रतियोगितासंबंधे
न तदेकदेशो भेदे उपमानस्य चंद्रादेरन्वयः। भिन्नस्यैव वृत्तित्वे चंद्रस्यापि वृत्तित्वेनान्वयः। आकांक्षाबलात्। न
च चंद्रभिन्नस्य वृत्तित्वान्वयो मदपेक्षयाऽधिक इति वाच्यं। वृत्तित्वनिष्ठविशेष्यतानिरूपितप्रकारतासंस
र्गेणान्वयबोधं प्रति चंद्रादिपदजन्योपस्थितित्वेन हेतुतस्य त्वयापि कल्पनीयतया तत्र चंद्रादिकमनिवे
श्य भेदप्रतियोग्यनुयोग्यन्यतरार्थकपदजन्योपस्थितित्वेनैककारणताकल्पनात्। उपमानानामनंततया
तद्घटितकार्यकारणभावानामानंत्येन तदपेक्षया लघुरीतेरेव लाघवेनादरणीयत्वात्। न च वृत्तित्वमेव न श
क्तिः। सामानाधिकरण्यसंबंधेन चंद्रभेदस्य धर्म एवान्वयाभ्युपगमात्। तथा च सामानाधिकरण्यसंबंधे
न चंद्रभेदविशिष्टो यो धर्मस्तद्वदैन्मुखमित्येव धीरिति वाच्यं। ममापि स्वाश्रयवृत्तित्वसंबंधेन भिन्नविशि
ष्टो यो धर्मस्तद्वदिति वक्तुमव्याघातात्। एतावान्परं विशेषः। तव विशेषणतासमायायामुभयघटितं सामा

चा१

प्र०की०
॥३७॥
37

नाधिकरण्यं संसर्गः। ममत्वभेदसमवायादिघटितं तदिति। विशेषणतापेक्षया च तादात्म्यस्य लाघवमिति सां
प्रदायिकसिद्धतया तादात्म्यस्य सामानाधिकरण्यघटकत्वे लाघवं परं ममापि तिरिच्यते। अथ धर्मस्य चंद्रभिन्ना
श्रयवृत्तित्वबोधेनैव मुखस्य तद्वत्त्वधीसिद्धा मुखे तद्वत्त्वस्य पौनरुक्त्यापत्तिरिति चेत्। सामानाधिकरण्यसं
बंधेन धर्मे चंद्रभेदवैशिष्ट्यबोधेपि तुल्यमेतत्। सांसर्गिकविषयतायाः सत्वेपि तत्प्रकारकबोधाभावान्न तथेति

मा

चेत्। ममापि समानमेव समाधानं। एवं सति धर्मे चंद्रगतत्वबोधानुपपत्तिस्तथा च तन्निरूपितसादृश्यबोधे मु
खे तद्वत्ताज्ञानेन स्याद्विना कांस्यत्वादि४५गानुपपत्तिरित्यथावयोस्तुल्यं। चंद्रवृत्तित्वप्रकारकबोधानुरो
धेन तत्र शक्तिरेवेत्यपि तुल्यमेव। न च चंद्रभिन्नवृत्तित्वबो५४ निवार्यं। मुखविशेष्यकतद्धर्मप्रकारकबोधस्य
ततोऽभावेन पौनरुक्त्याभावात्। अत एव घटत्वमित्यत्राभावप्रत्ययस्य समवायसंबंधावच्छिन्नप्रतियोगिताव
च्छेदकताकघटवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वार्थकतया घटवृत्तित्वस्य लाभेपि समवायसंबंधेन

॥३७॥

न

घटवृत्तित्वस्यघटत्वेप्राप्त्यभावेनप्रकृत्यर्थघटस्यघटत्वेसमवायेनान्वयोंगीकृतः।नहिचंद्रभिन्नवृत्तित्वंधर्मस्य
मुखवृत्तित्वबोधोभवति।तदन्यवृत्त्यापितत्पर्यवसानात्।नहितद्भिन्नत्वावच्छिन्नवृत्तित्वंतदर्थोबाधादितियत्किं
चिदेवतत्।अथैवमनन्वयविलोपापत्तिः।त्वन्मतेभेदस्योपमेयान्वयाभावेनतत्रापिचंद्रभिन्नवृत्तिचंद्रवृत्ति
धर्मवान्चंद्रइतिबोधसंभवादितिचेत्।चंद्रभिन्नत्वेसतिचंद्रगतधर्मवानितिबोधवादिनस्तवापिकथंनैतद्दोषा
वकाशः।उभयभेदस्यचंद्रेपिसत्वात्।व्यासज्यवृत्तिधर्माद्यनवच्छिन्नप्रतियोगिताकत्वादिनान्योन्याभाववि
शेषणादितिचेन्नादृशविशेषणमेवकिमर्थंदीयतइतिपर्यनुयोगात्।तत्रविवक्षितबोधनिर्वाहार्थंभिन्न
व्युत्पत्तिस्वीकारइतितुममापितुल्यं।नहिइवार्थभेदेतादृशप्रतियोगिताकत्वंविशेषणंदेयमेवेतिनियमः।भे
दविवक्षायांतत्रोपमात्वस्यापिस्वीकारात्।नचात्रमानाभावः।प्रामाणिकैर्बहुशोंगीकारात्।प्रत्युतधर्मेचंद्र
भिन्नवृत्तित्वबोधेनचंद्रस्यान्यनिष्ठसादृश्यप्रतियोगित्वलाभेनचंद्रनिष्ठसादृश्यप्रतियोग्यंतरव्यवच्छेदवं

अ॰का॰कौ॰
॥३८॥
38

ञ्जनानुगुणत्वात्। अन्यथोपमानांतरव्यावृत्तिवदुपमेयांतरव्यावृत्तेरपि व्यंजनप्रसंगात्। न चेष्टापत्तिः। चंद्र
स्यानन्यनिष्ठसादृश्यप्रतियोगित्वान्यप्रतियोगिकसादृश्यानाश्रयत्वोभयबोधे चमत्काराप्रकर्षस्यानुभवसि
द्धस्यापह्नोतुमनर्हत्वादित्यलं बहुना। इदं चात्र विभाव्यं। साधारणधर्मस्य शाब्दत्वे तद्रूपेणैव सदृशार्थः।
अन्यथा तु धर्मत्वेनैव। तथा च चंद्र इव मुखं रमणीयमित्यत्र चंद्रप्रतियोगिकान्योन्याभावसमानाधिक
रणं यच्चंद्रवृत्तिरमणीयत्वं तदाश्रयो मुखमिति बोधः। चंद्र इव मुखमित्यत्र तु तादृशचंद्रवृत्तिधर्मवन्मु
खमिति। अत एवात्र श्रौतीत्वमुपपद्यते। साधारणधर्मस्योपमानोपमेयोभयनिष्ठतायाश्च इवपदेन प्रति
पादनात्। तत्र सामानाधिकरण्येन तु उपमेयवृत्तित्वं वृत्त्यंतेनोपमानवृत्तित्वं इति विवेकः। न च चंद्रान्य
वृत्तित्वस्य ततो लाभेऽपि मुखवृत्तित्वस्याबोधात्कथमेतदिति वाच्यं। उपमेयस्यापि चंद्रान्यतया सामान्यत
स्तद्वृत्तित्वलाभात्। तावतैव प्रकृतव्यवस्थोपपत्तेः। ननु साधारणधर्मप्रयोगस्थले तस्यैव इवपदेनैव^ बोध

^ रमणीयादिपदेन १

॥३८॥

नेएकस्य निराकांक्षत्वादन्वयानुपपत्तिः। न चोभाभ्यामेकमेवोपस्थाप्यत इति वाच्यं। तावतापि चंद्र इव
सुखमाल्हादयतीत्यादावनुपपत्त्यनुद्धारात्। आल्हादकत्वस्य धात्वर्थतया नामार्थे मुखे आश्रयत्वा
दिभेदसंबंधेनान्वयायोगात्। धात्वर्थनामार्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नत्वात्। न च चैत्रेण सुप्य न
त इति भावार्थकप्रत्ययस्थले धात्वर्थस्य प्रतियोगितासंबंधेन नञर्थे नकलंकं भसमये दृत्यादौ नञर्थस्य
विशेषणतताविशेषसंबंधेन भसमये चान्वयदर्शनाद्दोष इति वाच्यं। तावता धात्वर्थनिपातार्थयोर
यो न्वयेपि निपातातिरिक्तनामार्थधात्वर्थयोरन्वयस्यादर्शनात्। अन्यथा तंडुलः पचती त्यत्र कर्मतासंसर्गे
ण तंडुलपाकान्वयापत्तेरिति चेन्न। तादृशस्थले आल्हादकत्वादिकं वाक्यार्थ एव धातुस्तत्तात्पर्यग्राह
कमात्रमिति वाच्यत्वात्। अथैवं हंसीव धवलश्चंद्र इत्यादेः कथं दुष्टत्वं। उक्तबोधे लिंगस्याप्रतिकूल भेद
त्वादिति चेत्। मैवं। न हि शाब्दं प्रतिकूलतैव दोषत्वं। उभयविशेष्यकबोधांगीकारेप्यतिप्रसंगस्याभिहित

बोध१

उपमानस्यन २

त्वात्। हीनत्वादिदोषाणां तत्प्रतिकूलतायाः संभावयितुमप्यशक्यत्वाच्च। अत एव यत्र पुल्लिंगेप्युपमेयेऽनेकस्य
स्त्रीलिंगस्यैव पुल्लिंगता संभवः। यत्र चैकवचनांतेप्युपमेये नित्यबहुवचनांतस्योपमानस्य नैकवचनांतत्व
संभवस्तत्र न लिंगवचनभेदेपि दोषः। तदुक्तमाचार्यदंडिना। न लिंगवचने भिन्ने न न्यूनाधिकतापि वा। उप
मादूषणायालं यत्रोद्वेगो न धीमतां। स्त्रीव गच्छति षंडोयं वक्त्येषा स्त्री पुमानिव। प्राणा इव प्रियोयं मे वि
द्याधनमिवार्जितेति। सहृदयोद्वेगबीजं तु उक्तरीत्या प्रकृतानुपयुक्तलिंगवचनविशेषोपादानमेव।
न च तन्नियतलिंगवचनेष्वितिन तत्रोद्वेग इत्यर्थः। एवमेवं काव्यादर्शविवरणकृद्भिर्मल्लिनाथादिभिर च
पि व्याख्यातं। नियतवचनत्वं तु स्वशक्यार्थाभिधाना नियतत्वरूपं। तत्त्वेनानुशासनत्वापर्यावसिषयत्वमि
ति यावत्। प्राणा दारा इत्यादेश्चैकस्मिन्नपि प्रयोगेणाबहुत्वाभिधानानियतत्वात्। तेन प्राणशब्दस्य कोषा
दावेकवचनांतत्वेनानुशासनेपि पुंसि भूम्न्यसवः प्राणा इति बहुवचनांतत्वेनाप्यनुशासनमस्त्येवेतिन

दोषसंभवः। चंद्रेण तुल्यं मुखमित्यत्र तु तुल्यपदस्य सादृश्यवानर्थः। केवलसादृश्ये तद्योगात्। सादृश्याभिन्नं
मुखमिति बोधापत्तेश्च। नामार्थयोर्भेदान्वयस्याव्युत्पत्तेः। तदेकदेशस्य सादृश्यस्य च चंद्रे प्र
तियोगिकान्योन्याभावसामानाधिकरण्यं। आश्रयश्च प्रत्ययार्थः। तृतीयार्थश्च वृत्तित्वं। तुल्यार्थैरतुलोप
माभ्यां तृतीयान्यतरस्यामिति सूत्रात्। अत एव चंद्र इव मुखं भाति चंद्रमिव मुखं पश्यामि चंद्रेणेव मुखेन कृत
मित्यादावुपमानस्योपमेयसमानविभक्तिकत्वनियमेपि चंद्रेण तुल्यं मुखं पश्यामीत्यादौ न मुखवृत्तिविभक्तिनि
यमः। अन्यथा च चंद्रधर्मयोर्नामार्थतया आश्रयत्वसंबंधेन धर्मे चंद्रान्वयो न स्यात्। अत एव वृत्तित्वस्यापि तुल्य
त्व पदार्थैकत्वकल्पनया न निस्तारः। नामार्थतासाम्यात्। ततश्चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणत्वस्य चंद्र यं
वृत्तित्वस्य धर्मेन्वयः। तस्य चाश्रयेतदर्थांतरे तथा च चंद्रान्योन्याभावसमानाधिकरणचंद्रवृत्तिधर्माश्रयाभिन्नं
मुखमिति धीः। अत्रोपमेयवृत्तित्वं धर्मोपस्थापकपदस्य उपमानवृत्तित्वं च तृतीयार्थः। अतउभयं धर्मवाच

अ॰का॰को॰ ॥८०॥ 80

रूपसार्थेनभवतीत्यतआर्थीउपमेत्युक्ते।नचोभयबोधसाम्यात्कथमयंविभागइतिवाच्यं।इवादेःसादृश्येशक्तेः।
तुल्यादेर्लक्षणात्यत्रापिकथमेवमितितुल्यत्वात्।प्रत्युतभिन्नपदप्रतिपाद्यत्वेनास्मन्मतेस एवविशेषात्।चंद्रमि
वमुखंपश्यामीत्यादौउपमानपदोत्तरविभक्तेश्चविशेष्यसमानविभक्तित्वस्यौत्सर्गिकतयासाधुत्वार्थो।नच
प्रथमोपस्थितितयासाधुत्वार्थंप्रथमैवस्यादितिवाच्यं।विशेषणातिरिक्तस्थलेतथात्वात्।नचचंद्रस्यमुखान्वया
भावान्नतथा।विशेषणविशेष्ययोरभेदान्वयार्थमेवैकविभक्तेरुपयोगादितिवाच्यं।विशेषणविशेष्ययोःस
मानविभक्तित्वमेवह्यौत्सर्गिकंतत्रचसाक्षादन्वयोऽभेदेनेत्यन्यदेतत्।नचपरंपरयाविशेषणस्यापितद्विभ
क्तित्वेऽद्भुतंरक्तत्वंदधतादंडेनविशिष्टइत्यादावद्भुतादेरपितृतीयापत्तिः।नामार्थेतराविशेषणीभूतेतिवि
शेषणेविशेषणस्यदेयत्वात्।नचचंद्रादेरपिप्रतियोगित्वेनइवार्थभेदान्वयात्कथंव्यावृत्तिरितिवाच्यं।निपातिरि ता
क्तनामार्थेतिवाच्यत्वात्।एवंचचंद्रेणतुल्यंमुखंपश्यामीत्यादावपिनानुपपत्तिरिति।नन्वेवमप्यव्ययविशेष ॥८०॥

णानां क्लीबत्वं भवतीत्यनुशासनादिवार्थविशेषणस्य चंद्रादेः क्लीबतापत्तिर्दुर्वारेति चेन्न। मैवं। स्त्रीवशौमा
शस्त्रीश्यामा मा मृगीव चपला मृगव चपलेत्यादिभाष्यकारादिप्रयोगसामर्थ्यादुपमेयवृत्तिलिंगसिद्धेः। अत एव
वार्थ एव धनुर्हर इत्यादावपि नानुपपत्तिः। अनियतलिंगविशेषपरत्वादुक्तानुशासनस्य न दोष इत्यत्र तात्प
ले र्यात्। चंद्रस्य तुल्यैत्यादौ तु तुल्यशब्दस्येव शब्दवत्सादृश्यमात्रमर्थः। तदर्थे भेदादौ प्रतियोगित्वादिसंबं
धेन चंद्रादेरन्वयासंभवात्तत्र षष्ठीप्रयोग इति विशेषः। तत्र श्रौतार्थत्वविषयकस्तद्धर्मत्वमावसरे वक्ष्यत
इति। चंद्रो मुखं च तुल्यमित्यादौ तु तुल्यपदार्थस्य चशब्दवाच्येतरेतरयोगबलेन चंद्रमुखयोर्युगपदन्वया
वगमाच्चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणतद्वृत्तिधर्मवन्मुखं मुखान्योन्याभावसमानाधिकर
णधर्मवांश्चंद्र इति धीः। अत एव मुखं चंद्रसदृशं न वा चंद्रो मुखसदृशो न वेति संदेहद्वयस्यापि ततो निवृत्तिः।
तुल्यपदार्थैकदेशस्य सादृश्यस्य चशब्दबलेनोभयत्रान्वयेपि सादृश्यवाचकपदस्योभयत्र धर्मान्वयबोधक

त्वविरहः स्पष्ट एव। तस्माद्यत्र धर्मोपस्थापकपदस्यैवोभयत्र संबंधबोधकत्वं तत्र श्रौत्यन्यत्रार्थीति स्थितं। उपमा
नादिविशिष्टत्वनियतशाब्दबोधविषयत्वं श्रौतीत्वं। इवादौ तथा नियमात्। तुल्यादौ तु चंद्रेण तुल्यमित्यत्र तथा
त्वेपि चंद्रो मुखं च तुल्यमित्यत्र प्रकृतत्वादिनैवोपमानोपमेयभावप्रतीतेर्विलंबादिति प्रकाशसिद्धांतः। रीक्षि
तस्तु सादृश्यमुख्यविशेष्यकज्ञानजनकपदप्रयोगे श्रौती अन्यत्रार्थीत्याहुः। इवादिभिः सादृश्यमनुयोगि
त्वसंबंधेनैव बोध्यते। तुल्यादिभिस्तु सदृशाभेदेनेति विभाग इत्यन्ये। तुल्यादिपदेष्वपि प्राप्ताप्राप्तविवेकेन
सादृश्यस्यैव विधेयत्वान्नेदं सम्यगित्यपरे। अथ धर्मोपस्थापकपदस्योभयसंबंधबोधकत्वेन श्रौतीति पक्षे तु
ल्यार्थकवतिप्रत्यययोगेपि श्रौती स्यात्। तथाहि। तुल्यादिपदोपादाने वृत्तित्वादीनां नामार्थत्वेन तत्र चंद्रादे
र्भेदान्वयानुपपत्त्या चंद्रवृत्तित्वादिकं चंद्रेणेत्यादिपदानामर्थ इत्युक्तत्वात्। तत्र चंद्रवृत्तित्वादिकं तुल्यपदार्थ
र्थेनेत्युक्तं। वतिप्रत्ययार्थे तु वृत्तित्वादौ चंद्रादेर्भेदान्वयस्योपपन्नत्वेन तत्र तेषामेव शक्तिकल्पनात्। तत्र वृत्ति

त्वमेदो धर्मस्य वत्यर्थः। पूर्ववदेवान्वये चंद्रान्योन्याभावसमानाधिकरणचंद्रवृत्तिधर्मवन्मुखमिति चंद्रवन्मुख
मित्यत्र बोधः। न चैवमापत्तिः। तत्रार्थी उपमेति सकलग्रंथविरोधापत्तेरिति चेन्न। उच्यते। तेन तुल्यमिति तुल्यार्थे
वतिविधानं। तथा च यावद्देववत्तुल्यपदेन बोधयितुं शक्यते तावद्देववतिनापि। आनुशासनिकार्थातिरिक्तार्थबो
धकत्वे सर्वत्राव्यवस्थापत्तेः। एवं च तत्रापि चंद्रपदस्य तद्वृत्तित्वे लक्षणा। अकरिष्यानुशासनसंमतत्वात्। प्र
तोनानुपपत्तिलेशोपि। अत एव पूर्ववत्सनदत्ति सूत्रे पूर्ववस्माद्द्विवतिभाष्यं पंचम्यंताद्वतिविधानाभावेनानुपप
न्नमाशंक्य कैयटेनोक्तं तुल्यार्थे विहितानतीयां सर्वविभक्त्यर्थानंतभावयतीति पंचम्यर्थस्यात्र ग्रहणमुपपन्न
मेव। यथा। ब्राह्मणवद्वैश्यादधीते ब्राह्मणादिव वैश्यादधीत इत्यर्थः। वैश्यापादानकस्याध्ययनस्य ब्राह्मणापा
दानकमध्ययनमुपमानमिति तत्र च ब्राह्मणशब्दो वर्त्तते। तेन ब्राह्मणेन तुल्यं वैश्यादधीत इति तृतीयांताद्वति
रेवमिहापि पूर्ववदिति। अथ वतिप्रत्ययप्रकृत्यर्थस्योपमानत्वनियमाच्चंद्रवृत्तित्वमेवोपमाने स्यादिति चेन्न। प्रकृ

अ.का.कौ.
॥४२॥

42

तिवाच्यस्यैवतथात्वात्। अन्यथाचंद्रत्वादेरप्युपमानत्वापत्तेः। नचैवंब्राह्मणाध्ययनमुपमानमितिग्रंथविरोधो
ध्ययनस्यलक्ष्यत्वादितिवाच्यं।भावानवबोधात्। प्रत्ययोत्पत्तिदशायांयदर्थबोधकत्वंतस्योपमानत्वनियमा
त्।नचैवमपिवृत्तित्वस्यधर्मान्वयानुपपत्तिःप्रकृत्यर्थत्वाभावादितिवाच्यं।प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबो
धकत्वमितिनियमेशक्यलक्ष्यसाधारणप्रकृत्यर्थोपादानात्। अन्यथागंगायांघोषइत्यादौतीरादेःसप्तम्य-
र्थान्वयोनस्यात्।तस्मात्तुल्यार्थेवतिविधानात्तदर्थएवतद्धितवृत्तिरितिसिद्धं।यत्तुब्राह्मणवत्वृषलवत्ब्राह्म
णादिवद्वृषलादिवेतिनिरुक्तेदृश्यतेतत्फलितार्थकथनमात्रं।प्रथमांतात्वृत्तिविधानाभावात्।किंच।तुल्यादि
पदानांसादृश्यमात्रार्थत्वेऽभेदान्वयापत्त्यातद्धितस्थलेऽपिवतिप्रत्ययस्यसादृश्यमात्रार्थत्वेनामार्थत्वाभावा
द्भेदान्वयानुपपत्तिरूपबाधकाभावेनलक्षणातेऽपितत्रश्रोतीत्वंस्यात्।उपमानत्वादिविशिष्टविषयत्वनियतशाब्दबो
धविषयत्वस्यापिवतिप्रत्ययत्वाच्छेदेनव्यभिचाराभावेनसादृश्यमुख्यविशेष्यकज्ञानजनकत्वसत्त्वात्।अनु

योगित्वसंबंधेनतद्बोधकत्वस्यापिसत्वाच्च।तथाचवतिप्रत्ययस्यतुल्यार्थेविधानेनतत्प्रयोगेयथाआर्यीतथा
त्य वतिप्रत्ययप्रयोगेपीतित्वयाकल्पनीयं।तदानुशासनिकमेवतुल्यपदसमानार्थकत्वंवतिप्रत्ययस्यमया
श्रयणीयमितिनिर्मूलकल्पनोपजीविनात्वयासमालंबितदृढतरप्रमाणावष्टंभस्यममोपरिबोधा
भासउद्भाव्यतइतिमहत्साहसं।तदुक्तं।आशामोदकतृप्तायेयेचोपार्जितमोदकाः।रसवीर्यविपाकादि
षां तुल्यंतैःप्रसज्यतेइतिदिक्॥केचित्तुसादृश्यंपदार्थांतरमभ्युपगम्यैवंबोधमाहुः।अरविंदसुंदरमित्यत्रा र
रविंदपदस्यारविंदनिरूपितसादृश्यप्रयोजकेलक्षणा।तस्यचाभेदसंसर्गेणसुंदरपदार्थैकदेशेसौं
दर्येन्वयः।चैत्रस्यनप्त्यादावेकदेशान्वयस्यबहुशोदर्शनात्।तथाचारविंदनिरूपितसादृश्यप्रयोज
काभिन्नसौंदर्यवदभिन्नंमुखमितिधीः।समुदायस्यैवतादृशविशिष्टार्थपरतेत्येके।अरविंदपदस्यैवलक्ष
णयासर्वोऽर्थः।सुंदरपदंतात्पर्यग्राहकमित्यन्ये।अत्रोच्यते।पक्षत्रयेप्यरविंदसुंदरमित्यत्रसमासगतवाच

कलुप्तोपमात्वंसिद्धांतसिद्धमसिद्धंस्यात्।सादृश्यवाचकपदसत्वात्।नचसादृश्येलक्षणेतिनतद्वाचकप
दसत्वमितितद्विरोधइतिवाच्यं।वाचकत्वंह्यत्रनस्यात्तदुपस्थापकत्वमेव।नतुशक्त्यंतर्भावेगौरवात्।अ
न्यथातेनतुल्यमित्यादिनाविहितवत्यादेरपिधर्मिशक्त्यापदार्थतावच्छेदकीभूतसादृश्येशक्त्यभावात्त
त्रापिवाचकलुप्तत्वापत्तेः।नचलक्षणमतेवत्यादीनांसादृश्येशक्तिलक्षणयोरन्यतराभावेनदोषसाम्यमितिवा
च्यं।वृत्त्यातद्विषयतानियतबोधजनकतायाविवक्षितत्वात्।नचवृत्तित्वस्यशक्तिलक्षणान्यतरत्वरूपस्य
निवेशापेक्षयाशक्तिनिवेशेकृतेगौरवमितिवाच्यं।शक्तिजन्यबोधस्यलक्षणाजन्यबोधात्प्रकृतेवैलक्ष
ण्याभावेनविशेषनिवेशानुपपत्तेः।चमत्कारस्यप्रयोजकरूपस्यैवोपमाविभाजकत्वात्।अतएवमृगनयना
हरतेमुनेर्मनइत्यत्रवाचकधर्मोपमानलुप्तामुदाहरताकाव्यप्रकाशकृतासपत्न्युपमानेत्यादिनासमासलो
पोयदाभवत्तददमुदाहरणमित्युक्तं।यत्तुकैयटाद्युक्तरीत्यामृगपदस्यैवमृगनयनसदृशेलक्षणेतिस्त्री

क्रियते तदा तदर्थकमृगपदाद्यसत्त्वे। नोपमानलुप्तत्वाभावादिति ते हि दशयः। यदपि तेरुक्तं। तत्रापि त्रिलुप्ते
व। लक्षणापक्षे वृत्तेर्विशिष्टार्थवाचकत्वमिति वैयाकरणमतेपि स्वस्वमात्रबोधकपदाभावात्त्रयाणां लो
पसंभवादिति। तदप्यसत्। मात्रपदोपादाने बीजाभावात्। गौरवाच्च। स्वेतराबोधकत्वे सति स्वबोधकस्य
तदर्थत्वात्। असिद्धेश्च। उपमानादिपदानामपि चंद्राद्यन्यचंद्रत्वतत्संबंधादिबोधकत्वात्। अथ स्वविष
यकत्वाभाववद्वृत्तिविषयिताकान्यज्ञानजनकत्वं तदर्थ इति चेत् तर्हि प्रकृतेपि यत्तु न्यक्कृतदृष्टिप्रक्षेपः। अ
तएव चकाव्यस्य सदृशमित्यत्र सदृशपदस्योपमाने लक्षणां कृत्वा तदानीं सादृश्यवाचकपदाभा
वेन द्विलुप्तत्वं स्यादित्याशंक्य सादृश्यप्रतियोगित्वरूपोपमानत्वार्थकसदृशपदसत्त्वेन वाचकलोपा
भाव इति व्याख्यातं न्यायालंकारादिभिः। तद्वदीत्यातु लक्षणागम्योपमार्थे लुप्तव्यवहारात्तुल्यस्य तावच्छेदकी
भूतसादृश्यसमुत्पसंतदर्थत्वाभावादनुपपत्तिः स्यात्। किंच। अरविंदवत्सुंदरमित्यत्र तेन तुल्यमिति विहित
स्य

अ·का·को·
।।५५।।
५५

स्यवतेः सादृश्यवदर्थस्य सादृश्येलक्षणोत्युक्तालक्षणयाऽरविंदाभिधानार्थत्वमिति स्वयमेवोक्तं। अत्र स्यरी
त्यातु तत्रापि वाच्यकलुषत्वं स्यादिति स्वग्रंथविरोधात्तैः पितुः परिहरइत्यादिक्।। यदपि अरविंदवंदं मिव भा
तीत्यत्र इवार्थः सादृश्यं। तत्रारविंदस्य निरूपितत्वसंबंधेनान्वयः। सादृश्यस्य च प्रकारतासंबंधेन धा
त्वर्थज्ञानेन्वयः। तथा चारविंदनिरूपितसादृश्यप्रकारकधीविशेष्यइति बोधः। सौंदर्येलत्यस्याप्युपा
दानेतृतीयार्थः प्रयोज्यत्वं धात्वर्थभाने इवार्थसादृश्येवान्वेति। तेन सौंदर्यप्रयोज्यारविंदनिरूपितसादृ
श्यप्रकारकधीविशेष्य इति बोध इति।। अत्र ब्रूमः।। प्रकारतयासादृश्यान्वयबोधं प्रति तदनुयोग्युपस्था
पकपदजन्योपस्थितित्वेन हेतुतेति कार्यकारणभावो लाघवात्कल्प्यते। चंद्रइवमुखमित्यादि साधारण्या
त्। अरविंदनिरूपितसादृश्यवन्मुखमित्येव बोधात्। सुंदरादिपदोपादाने पि तादृशसादृश्यवन्मुखं सुंद
रमित्येव बोधात्। सादृश्यप्रयोजकधर्माकांक्षायां सौंदर्यस्यैव मानसेन तत्वेन विषयीकरणाच्च सौंद

र्यं लस्तु क्कौच सौंदर्यप्रयोज्यारविंदसादृश्यवन्मुखमित्येव बोधः। न च मुखं न चंद्र इवेत्यादौ सादृश्यस्य प्र
तियोगितासंबंधेन अर्थे प्रकारत्वाद्व्यभिचार इति वाच्यं। प्रतियोगितातिरिक्तत्वस्य कार्यतावच्छेदके भि
धेयत्वात्। प्रकृते च तेन संबंधेन तदनुदयात्। एवं चंद्रसादृश्यं मुखवृत्तीत्यत्रापि न व्यभिचारः। प्रकारता
संबंधेन सादृश्यस्यान्वयबोधात्। नन्वेवमरविंदमिव सुंदरं मुखमिति शाब्दबोधान्मुखवृत्त्यरविंदीयसा
दृश्यसौंदर्यप्रयोज्यं न वेति संशयनिवृत्तिर्न स्यात्। तद्बुद्ध्या सादृश्ये सौंदर्यप्रयोज्यत्वमानसगम्यत्वा
त्। न च तत्र मानसोत्तरमेव संशयनिवृत्तिर्न तु शाब्दबोधाव्यवहितोत्तरं। स्मरणविलंबस्य दुर्वचत्वादिति वा
च्यं। तत्कल्पने प्रमाणाभावादिति चेन्न। अरविंदमिव भातीत्यत्रारविंदनिरूपितसादृश्यप्रकारकधीविशेष्य
इत्येतद्बोधादप्यरविंदसदृशं न वेति संशयानिवृत्तिप्रसंगसत्वात्। स्मरणविलंबकल्पनस्य चोभयत्र सत्वात्।
एवं चारविंदमिव भातीत्यत्रापि तादृशसौंदर्यवन्मुखं ज्ञानविषय इत्येव बोधः। अन्यथोक्तकार्यकारणभा

वेव्यभिचारापत्तेः। तादृशसंबंधेन बोध्ये धातुजन्योपस्थितिहेतुत्वकल्पनागौरवाच्च। नन्वेवं चैत्रस्य सादृश्य
प्रकारकज्ञानाभावेपि अरविंदमिव मुखं चैत्रस्य भातीति प्रयोगः स्यात्। तादृशसौंदर्यवतो मुखस्य ज्ञानवि
षयत्वात्। मम तु सादृश्यप्रकारकत्वस्य ज्ञाने लाभान्न तथेति चेत्। इष्टापत्तेः। रूपांतरेण मुखज्ञानस
त्वेपि मुखं चैत्रस्य भातीत्यादिप्रयोगात्। न च मुखत्ववन्मुखं भातीति न तदा प्रयोग इति वाच्यं। बाधकाभा
वात्। प्रकारत्वार्थकविभक्त्यादिविरहाच्च। वस्तुतो मुखवद्यन्मुखं न ज्ञातीति बोधात्। अत एवोक्तबोधाच्चै
त्रो मुखत्वप्रकारकज्ञानवान्न वेति संशयानिवृत्तिः। अतश्चारविंदसादृश्यवन्मुखं भातीत्यत्रापि वस्तुतोर
विंदसादृश्यवन्मुखं ज्ञानविषय इत्येव बोधः। भानांतरेण चैत्रीयज्ञानस्य सादृश्यप्रकारकत्वनिश्चयेन तत्सा
दृश्यप्रकारकज्ञानवान्न वेति संशयनिवृत्तिर्नेत्यैथित्यनुभवसिद्धमेतत्। तदवच्छिन्नप्रकारताकज्ञाननिश्चयस्ये
व तदवच्छिन्नप्रकारताकज्ञानाभावबुद्धिप्रतिबंधकत्वात्। अरविंदं सुंदरं मुखं मम भातीत्युक्तौ तु वाक्यार्थज्ञा

नविधया वक्त्ररिसादृश्यप्रकारकत्वं ज्ञानस्य लभ्यते। अत एवारविंदसुंदरं मुखं बालानां यथास्थितमेव भा
तीत्यादावपि न ज्ञाने तत्प्रकारकत्वलाभ इति स्पष्टमेव। अपि च। अरविंदमिव भाति। इत्यस्यारविंदसदृशं न वे
ति संशयनिवृत्तिरनुभवसिद्धा। सा च लघुतरीत्याहुर्घटा। न च समानाविलंबकत्वान्नान्निस्तारः। तत्प्रकारकधी
विशेष्यत्वस्य तद्धत्वा। व्यभिचारेणातदुत्तरमप्यरविंदसदृशमिति मानसासंभवात्। न च प्रमाविशेष्यत्वं तद
र्थ इति वाच्यं। कुमुदमिव मुखमित्यादौ तदभावात्। प्रमायाधातोरर्थत्वाभावाच्च। अस्माकं त्वरविंदसदृशं मु
खं ज्ञानविषय इति बोधे प्रतिबंधकज्ञानं निर्वाहान्नकाप्यनुपपत्तिः। न चैवमपि मुखं अरविंदमिव भातीत्य
त्रारविंदसादृश्यप्रकारकधीविशेष्य इति धीरावश्यकीति वाच्यं। तत्रापि स्वप्रकारकज्ञानविषयत्वसंबंधे
न सादृश्यवदित्येव बोधात्। धातोरुक्तसंसर्गतात्पर्यग्राहकत्वात्। न च सादृश्यप्रकारकधीविषयो न वे
ति संशयाद्यनिवृत्तिप्रसंगः तत्प्रकारकतदभावज्ञाने तत्संसर्गकबुद्धेरप्रतिबंधकत्वादिति वाच्यं। तादृशस्थे

पिप्रतिबंधकत्वाभ्युपगमात्। स्मरणाविलंबकल्पनाद्येतिदिक्॥ अतएवारविंदतुल्योभातीत्यत्रापिनानुप
पत्तिः। त्वन्मतेसादृश्यस्यनिपातभिन्ननामार्थत्वेनधात्वर्थेभेदेनान्वयानुपपत्तेः। भवतुतुल्यपदस्यतुल्य
त्वप्रकारकेलक्षणातस्यचाभेदसंबंधेनधात्वर्थान्वयइतिवाच्यं। तथासतिक्रियाविशेषणानांकर्मत्वे
नपुंसकलिंगताचवक्तव्येत्यनुशासनात्क्लीबत्वापत्तेः। यत्तुस्तोकंपचतीत्यादिविषयत्वमात्रेणा
नुशासनोपपत्तिरिति। तदसत्। संकोचेमानाभावात्। अपिच। अरविंदतुल्योभाति। अरविंदवद्भाती
त्याभ्यांतुल्यविषयकोनुभवः। तत्रतुप्रथमेरविंदत्वप्रकारकप्रकारकाभेदसंसर्गकज्ञानविशेष्यकद्वि
तीयेत्वरविंदसादृश्यप्रकारकप्रकारत्वसंसर्गकज्ञानविशेष्यकइतिवैषम्यापत्तिः। अरविंदतुल्योन
भातीतिशाब्दबोधोत्तरमरविंदवद्भातीत्येतद्वाक्यजन्यशाब्दबोधापत्तिश्च। ग्राह्याभावानवगाहिज्ञान
स्यप्रतिबंधकत्वाभावात्। यदपिधातोरेवलक्षणयासादृश्यप्रकारकज्ञानमर्थः। तुल्यपदंतात्पर्यग्राह

कमिति। तदप्यसत्। तुल्यपदस्य सादृश्यानुपस्थापकत्वेउक्तोपमाया आर्थत्वव्यवस्थित्यभावात्। नच सादृ
श्यतात्पर्यग्राहकतामात्रेण तथात्वमिति वाच्यं। तात्पर्यग्राहकत्वस्य श्रौतार्थत्वव्यवस्थापकत्वे मानाभा
वात्। किंच। तथापि स्त्रीत्वापत्तिरनिवार्यैव। स्वार्थपरविशेषणस्यैव समानलिंगत्वमिति चेत्। तर्हि सामा
न्येन पुंसकमिति स्त्रीत्वपराहतं पुंस्त्वं कथं समादधीथाः। तस्मादालंकारिकसिद्धांतानुरोधिनां यथोक्तरी
त्याश्रयणमेव युक्तमित्यलं बहुना॥ गजइव गच्छतीति पिकइव रौतीत्यादावपि गजपदस्य तद्गमने लक्षणात
स्य सादृश्ये प्रतियोगित्वेनान्वयः। तस्यानुयोगित्वेन धात्वर्थे गमने। तथा च गजगमनसदृशगमनानुकू
लकृतिमानित्यादिबोध इति केचित्। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधं प्रतिवि
शेष्यतया विभक्त्यर्थोपस्थितिहेतुत्वस्यावश्यकत्वात्तया सादृश्यस्य धात्वर्थान्वयासंभवात्सादृश्यस्य ग
मनकर्तर्येवान्वयः। कर्ता गजसादृश्यं च स्वगमनसदृशगमनकर्तृत्वमित्यन्ये। केचित्तु एवं सति सादृश्य

स्यविधेयतयाप्रतीतिरनुभवसिद्धानसिद्धोत्। गजइवयःपुरुषःसगच्छतिपुरुषोयःसगजइवगच्छतीतिवा
क्याभ्यांभिन्नविधेयकप्रतीतिजननात्। वनंगजइवगरहंदेवदत्तोगच्छतीत्यादौवनादेरनन्वयापत्तेश्चगम
जनिरूपितसादृश्यप्रयोजकगमनाश्रयत्स्येवबोधः। उक्तकार्यकारणभावस्त्वनांगीकार्यः। नचघटोन
पश्यतीत्यत्रघटाभावंपश्यतीतिधीवारणायतदावश्यकत्वमितिवाच्यं। धात्वर्थेनिष्ठविशेष्यतानिरू
पितप्रकारतासंसर्गेणान्वयबोधंप्रतिनञ्जन्योपस्थितिमात्रस्यप्रतिबंधकत्वकल्पनादित्याहुः। व
स्तुतस्तुगजप्रतियोगिकसादृश्यवान्पुरुषोगमनानुकूलकृतिमानित्येवधीः। सादृश्यस्यचधर्मान्तर
निमित्तकत्वेतात्पर्यज्ञानेउक्तधियएवावश्यकत्वात्। यत्रापिगमनप्रयोज्यमेवसादृश्यंविवक्षितंतत्रा
पिसादृश्येगमनप्रयोज्यत्वज्ञानंमानसमेव। अतएवधर्मांतरप्रयोज्यसादृश्यविवक्षायांपुरुषगमनं
नगजगमनसदृशमितिबाधज्ञानसत्वेपिगजसदृशःपुरुषोगमनानुकूलकृतिमानितिधीर्भवत्येव॥

अयं चात्र विशेषः। धर्मान्तरप्रयोज्यसादृश्यविवक्षायां गज इव गच्छतीति धर्मलुप्तागमनप्रयोज्यसा
दृश्यविवक्षायां तु न तथेति। न च गमनस्य साधारणधर्मतायामानन्दगम्यत्वात्तन्मते गमनप्रयोज्यत्व
विवक्षायामपि धर्मलुप्तत्वापत्तिरिति वाच्यं। साधारणधर्मस्य शाब्दत्वादेव तदभावात्। न हि शाब्दबोध
विषय एव धर्मस्य साधारणत्वेन धर्मलुप्तत्वमिति नियमे प्रमाणमस्ति। बिंबप्रतिबिंबभावादौ शाब्दबोधो
त्तरमुभयोर्द्धर्मयोरभेदस्यमानसविषयतया तत्रापि तदापत्तेरसंभवापत्तेश्चेति न किंचिदेतत्। पिक इ
व रौति च कूर्दैरविना कुररीव भूयइत्यादावपि पिकरुतसदृशरुतानुकूलव्यापारवानित्यादिर्न बोधः। पिक
प्रतियोगिकसादृश्यवान् रौतीत्यादेरेव बोधस्य स्वीकारात्। तदुत्तरं सादृश्यस्य रुतनिमित्तकत्वज्ञानं मा
नसमेवेति सर्वनिर्वाहात्। नन्वेतदनुपपन्नं। तथा हि। यत्र गजं सादृश्याभावव्याप्यवद्गमनमित्येषे सा
ज्ञात्मकः परामर्षः गज इव गच्छतीति शाब्दसामग्री च तत्र शाब्दबोधो जायतामिति तीव्रासत्वेरच्छाघटितत्वे

नशाब्दसामग्र्या बलवत्वाद्गजसदृशो गच्छतीति बोधः। न तूत्तरक्षणे गजगमनसदृशं न गमनमित्यनुमि
तेरेवोत्पत्त्या गजगमनसदृशगमनमिति मानसं न संभवति। एवं तद्रूपबाधज्ञानसत्वात्तदुत्तरक्षणेपि न
तादृशमानससंभवः। तथा च सादृश्ये गमनप्रयोज्यत्वज्ञानं सर्वानुभवसिद्धं न निर्वहेत्। मम तु गमने गज
गमनसादृश्यस्य शाब्दबोधविषयतया शाब्दबोधकाल एव तद्बोधावश्यकत्वान्नानुपपत्तिरिति चेत्।
उच्यते। तत्रापि शाब्दबोधाच्चतुर्थक्षण एव सादृश्ये गमनप्रयोज्यत्वज्ञानाभ्युपगमे सति निरस्तात्। किंच।
गज इव गच्छतीत्येतद्वाक्यजन्यशाब्दबोधात्पुरुषो गजसदृशो न वेति संशयनिवृत्तिरनुभवसिद्धा। गज
सदृशो नेति ज्ञाने सत्येतच्छाब्दबोधानुदयश्च। एतच्छाब्दबोधे सति गजसदृशो नेति बुद्ध्यनुत्पत्तिश्चेति
निर्विवादं। त्वन्मते च गमने गजगमनसादृश्यबोधेपि पुरुषे गजसादृश्यस्यैतदविषयत्वात्सर्वमिदं दुर्घ
टं। मम तु पुरुषे गजसादृश्यस्यैतद्विषयतया नानुपपत्तिः। न च धर्मसादृश्येन धर्मिसादृश्यस्यापि सि

सिद्ध्यासत्त्वाविलंबकत्वनादरदोषइतिवाच्यं।गजसदृशोनेतिबाधज्ञानसत्वेएतज्जन्यशाब्दबोधाप
त्तेस्तथाप्यवारणात्।नचतन्मतेपिगमनंनगजगमनसदृशमितिज्ञानेसत्यपितत्कशाब्दबोधापत्ति
स्तकल्पेतिवाच्यं।ममशाब्दबोधात्पूर्वंगजसदृशइतियोग्यताज्ञानसत्तायाआवश्यकत्वात्।तत्सत्वेच
तद्गमनसादृश्यबोधस्यापिसामग्रीसत्वेनावश्यकतयागजगमनसदृशमितिबोधस्यपूर्वमनियमा
त्तद्बोधेपिबाधकाभावात्।नगजगमनसदृशमितिज्ञानेसतिचगजसादृश्यज्ञानरूपयोग्यताज्ञाना
भावादेवतदनुत्पत्तेः।नचममापिगजगामनसदृशमितियोग्यताज्ञानेगजसादृश्यज्ञानस्यापिसत्वेनो
क्तरीत्यैवनानुपपत्तिरितिवाच्यं।धर्मसादृश्येधर्मिसादृश्यनियमाभावात्।नहिधर्मिसादृश्यंविनाध
र्मसादृश्यमनुपपन्नं।अपितुधर्मसादृश्यंविनाधर्मिसादृश्यमेव।उपपादकस्योपपाद्यंविनानुपपत्त्य
भावात्।अन्यथोपपाद्योपपादकभावव्याघातापत्तेः।तथाचगजसादृश्यंतद्गमनसादृश्यंविनानुपपन्न

मितितस्यतदाक्षेपकत्वमुचितंनतुगमनसादृश्यस्यगजसादृश्याक्षेपकत्वं।अतश्चगजगमनसादृश्य
स्यैवमानसत्वकल्पनमुचितमिति।यदितुगमनसादृश्याभिप्रायेणैवगजइवगच्छतीत्यादिप्रयोगइ
तिशपथःक्रियते।तर्हिप्रतियोगित्वातिरिक्तसंसर्गावच्छिन्नप्रकारतासंसर्गेणसादृश्यबोधंप्रतितदनु
योग्युपस्थापकपदजन्योपस्थितित्वेनहेतुत्वमितिकार्यकारणभावेपदंशब्दमात्रंबोध्यं।अतोधातोरपि
संग्रहः।एवंचगमनस्यसादृश्याश्रयतयाधात्वर्थेपितत्रसादृश्यान्वयः।तथाप्यरविंदमिवभातीत्यादौ
ज्ञानेसादृश्यान्वयोनुपपन्नएवेतिदिक्॥स्वप्नार्थकीदृशस्यपदस्ययोगेप्यौतीकीदृशस्यचार्थीस्यातआ
ह।स्यादिवयथाद्वियोगेवतौ ------------- तुल्यादिकपदयोगेपितौतदर्थेपिचार्थीसा।इ न
८ वर्षस्ययथापदस्यआक्षिपन्नाह्वाशब्दादीनां।तत्रतस्येवेत्यनेनषष्ठीसमर्थात्सप्तमीसमर्थाच्चविहितस्य
वतिप्रत्ययस्यचोपादानेप्राप्तौ।तुल्यसदृशादिपदयोगेतेनतुल्यमितितुल्यार्थविहितवतियोगेचआ

थी।स्यर्थः।उपमार्थकाश्चोक्ता दंडिनाकाव्यादर्शे।इववद्वायथाशब्दाःसमाननिभसंनिभाः।तुल्यसंकाशनी
काशप्रकाशप्रतिरूपकाः।प्रतिपक्षप्रतिद्वंद्विप्रत्यनीकविरोधिनः।सदृक्सदृशसंवादिसजातीयानुवा
दिनः।प्रतिबिंबप्रतिछंदसरूपसमसप्रभाः।सलक्षणसदृक्षाभाःसपक्षोपमितोपमाः।कल्पदेशीयदे
श्यादिप्रख्यप्रतिनिधी अपि।सवर्णतुलितौशब्दौयेचान्यूनार्थवादिनः।समासश्चबहुव्रीहिःशशांकव
दनादिषु।स्पर्द्धतेजयतिद्वेष्टिद्रुह्यतिप्रतिगर्जति।आक्रोशत्यवजानातिकदर्थयतिनिंदति।विडंबयति
संरुंधेहसतीर्ष्यत्यसूयति।तस्यपुष्णातिसौभाग्यंतस्यकांतिंविलुंपति।तमन्वेत्यनुबध्नातितच्छीलंतन्नि
षेधति।तस्यचानुकरोतीतिशब्दाःसादृश्यसूचिनः।कविकल्पलतायां।बंधुश्चोरःसुहृद्वादीकल्पःप्र
ख्यःसमःप्रभः।देशीयदेश्यरिपाभसोदराद्याइवार्थकाः।ववायथातथावैवंइत्यमरवशब्दोपिइवार्थः।
शात्रवंवपयुर्यशाइतिकालिदासः।कादंबखंडितदलानिवपंकजानीतिपूर्वप्रयोगः।अत्रनिपातसंज्ञाइवा

देश्य

दयः। वदिति इवार्थे तुल्यार्थे च वति प्रत्ययः। कल्पदेश्यदेशीयरस्तद्धिताः प्रत्ययाः। ते च यद्यपि ईषदसमाप्ता
विति सूत्रेण विहितास्तथापि ईषदसमाप्तेरपि सादृश्यपर्यवसानात्। तदुक्तं कैयटेन। गुड इव ईषद
समाप्तो गुडो वा गुडकल्पा। यद्यप्यत्रोपमानग्रहणं नोपात्तं तथापि सामर्थ्यादुपमानोपमेयभावइ
ति। वाच्यलिंगाः समस्तुल्यः सदृक्षः सदृशः सदृक्। साधारणः समानश्चस्युरुत्तरपदेत्वमी। निभसं
काशनीकाशप्रतीकाशोपमादयः इत्यमरः। तत्र प्रत्ययादीनामुपमानोत्तरमेव प्रयोगः तस्यैव तत
प्रकृतित्वात्। निभादीनां तु नित्यसमासविषयत्वात्। चंद्रेण समं च निभं इत्यादिरीत्या विग्रहः कार्यः। त
दुक्तं क्षीरस्वामिना। उत्तरपदे इत्युक्तेश्चंद्रेण निभमिति न भवतीति। वैरी वाचकाः सुहृद्वाचका बंधुवा
चकाश्च शब्दाः सादृश्यार्था ज्ञेयाः। शशांकवदने त्यत्र सप्तम्युपमानपूर्वपदो बहुव्रीहिरिति समासः।
प्रतिबिंबस्पर्द्धि इत्यादयः सादृश्याक्षेपका ज्ञेयाः॥ तत्र वाक्यभेदोतीयथा। इति दृशौ नैषधस्तनतामतै

॥५०॥

विदर्भजन्माभ्रमशमुल्ललास सा। ऋतोरधिश्रीः शिशिरानुजन्मनः पिकस्वरैरेरविकस्वरैर्यथा। अत्र वसं
तश्रीरुपमानं भैम्युपमेया। यथेत्युपमावाचि। उल्ललासेति साधारणधर्मः। न चैषां कस्यापि समासवृ
त्तिवाक्यगा। यत्तु प्राचीनैर्वाक्यगायां यथाशब्द एवोदाहृतः तन्न। इवेनापि समासस्य नित्यत्वाभावात्।
अन्यथा उद्बाहुरिव वामनः स्यामित्याद्यनुपपत्तेः। जीमूतस्येव भवति प्रतीकमित्यत्र शास्त्रांतरे समासेन शा
स्त्रांतरे चासमासेन पदकारैः पाठाच्चेति। तत्र निर्णीतत्वादिति बोध्यं। वाक्ये आर्थी यथा मम। तुलसीद
रादुदीताभा मिनिसौदामिनीलिखा। नीलनिचोलादाविर्भूता कांतिश्च्युते समारम्या। अत्र समपदप्रयो
गादार्थी॥ समासे श्रौती यथा। आविर्भवंती प्रथमं प्रियायाः सोच्छ्वासमंतःकरणं करोति। संतापदग्धस्य
शिखंडियूनो वृष्टेः पुरस्तादचिरप्रभेव। अत्र इयं हीति पूर्वशेषात्कामंदकी उपमेया। अचिरप्रभेवेत्यत्र इ
वेन सह समासः। आर्थी यथा मम। द्युतीनां संदोहैर्बहु विशदयंती दशदिशो हरंती संतापानुपगतवती

स्पर्शविषयम्। प्रयातास्वच्छं देहं समधिसुधादीधितिकला समानेयं केषां न हरति मनस्ते तनुलता॥ अत्र
समानपदप्रयोगात्तस्य समासांतर्गतत्वाद्धा तद्धिते श्रौती यथा मम। सुकुमारत्वमहणता दृशो वैशी
कारकारणत्वं च। भाति हि मत्तकाशिनिपालि युगे तामरसवत्ते॥ अत्र इवार्थे सप्तम्यर्थे वतिः। षष्ठ्यर्थे
तत्रैव यथा। प्रत्यग्रमेघवदियं केशकलापस्य तेऽछाया। संतर्पितजननयना तिरयति संतापसंतानं॥
मेघस्येवेति षष्ठ्यर्थे वतिः। वेदेपि यथा। प्रियमेधवदत्रिवज्जातवेदो विरूपवत्। अंगिरस्वन्महिव्रतप्र
स्कण्वस्य श्रुधी हवं। प्रियमेधस्येवेति वतिः। एतेषां ऋषीणामाह्वानं यथा त्वयाश्रुतं। तथा प्रस्कण्वस्य
मुनेः शृणु इत्यर्थः। आर्थी यथा मम। अनुन्नतिमानस्तिकठिनः समुदितनखत्रमालोयं। बाले पयोधरस्त
वकनकाचलवद्दूरीवर्ति। इह तुल्यार्थे वतिः। तदेवं षड्विधा पूर्णा व्याख्याता॥ अत्रेदं शंक्यते। चित्रका
व्यमिह निरूप्यं। तच्च व्यंग्यारहितत्वे सति। यदुक्तं। शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतमिति। अस्ति

चोदाहृतेसर्वत्रव्यंग्यमिति।तत्राहुः।रसादिरूपंव्यंग्यंसर्वत्रास्तीतितस्यावर्जनीयसंनिधितयानस्ला
दरलोनैवउपमादयउदाह्रियंते।व्यंग्यबोधान्नतत्रचमत्कारः किंतुवाच्यवैचित्र्यादेवेति।केचित्तुतास
र्यविषयव्यंग्यरहितत्वमेवचित्रत्वं।तदुक्तं।रसभावादिविषयविवक्षाविरहेसतिअलंकारनिबंधायःस
चित्रविषयोमतइत्याहुः।अथलुप्तानिरूप्यते।अन्यतमस्यचतुर्णांविरहेलुप्तांवदंत्याप्ताः।चतुर्णामु
पमानोपमेयवाचकधर्माणामन्यतमस्याप्रयोगेलुप्ता।साचत्रिधासंभवति।एकलोपेद्विलोपेत्रिलो
पेचेत्यर्थः।तत्रविशेषानाह।अन्यतमस्यविलोपेवाचकधर्मोपमानानां।धर्मांजकयोरंजकसमयोर्धर्मो
पमानयोःसमान्येषां।अत्रपूर्वोद्दिष्टैकलुप्तायास्त्रयोभेदाः।वाचकलोपे।धर्मलोपे।उपमानलोपेचेत्य
र्थ।उत्तराद्दिष्टंषड्युतत्रयेलोपइत्यस्यानुषंगः।सामान्यधर्म वाचकयोः।वाचकोपमेययोः।धर्मोपमान
योश्चलोपात्द्विलोपात्रिविधेत्यर्थः।समान्येषांउपमानभिन्नानांत्रयाणांउपमेयधर्मवाचकानांलो

पेत्रिलोपात्एकविधेत्यर्थः। सामान्येषामित्यत्र समपदं सादृश्यप्रतियोगिपरं। प्रत्येकमेतद्भेदानाह।
धर्मविलुप्ते श्रौत्यार्थी वृत्तौ वाक्ये च तद्धिते त्वार्थी। अस्यार्थः। वाक्ये समासे च श्रौत्यार्थीभेदेन चत्वारः।
तद्धिते त्वार्थ्येवेति। धर्मलुप्तायाः पंचभेदाः। ननु तद्धिते श्रौती धर्मलुप्ता कुतो नोच्यते इति चेत्। न। तत्र त
स्यैवेति सूत्रेण विहितस्य वतेः प्रयोगे हि तद्धिते श्रौती संभवति। न च तत्र धर्मलोपः संभवति। उपमेयो
पमानधर्मसंबंधबोधकस्य तस्य साधारणधर्मप्रयोगं विनानुपपत्तेः। नहि मथुरायामिव मथुरावत्
स्रुघ्ने इति संभवति। सप्तम्यर्थाधारत्वस्यान्वयापत्तेः। किंतु मथुरावत्स्रुघ्ने प्राकार इत्येव। तस्मात्षष्ठ्यर्थसंबंध
विशेष्यस्य सप्तम्यर्थाधारत्वविशेष्यस्य साधारणधर्मरूपस्य प्रयोगं विना इवार्थवतेरसंभवान्न त
द्धिते श्रौती धर्मलुप्ता। ननु मा भूत् इवार्थकवतियोगे धर्मलुप्ता श्रौती। तथापि इवार्थकतद्धितान्तरे सा
दुर्वारा। तथाहि। इवे प्रतिकृतावित्यधिकारे कुशाग्राच्छः इति सूत्रेण कुशाग्रमिव कुशाग्रीया बुद्धिरित्य

त्रं छप्रत्ययविधानेन एतादृशस्थले तत्संभवादिति चेत्। अत्राहुः। इवे प्रतिकृतावित्यधिकारे विहिताः प्र
त्ययास्तुल्यार्था एव। कुशाग्रतुल्या बुद्धिरिति अभेदान्वयदर्शनात्। तस्य सादृश्यमात्रार्थत्वे तद्धूसरत्वा
भावेनोपमेयसामानाधिकरण्यासंभवात्। न चेवार्थे तद्विधानविरोधप्रसंग इति वाच्यं। सादृश्ये विधा
नमपि सदृशे पर्यवस्यतीत्यभिप्रायेण सूत्रे इवार्थे तद्विधानेन तदविरोधादिति। अथ सादृश्यादिपदप्र
योगे श्रौत्यार्थी वा। यथा। परस्परादि सादृश्यमदूरोज्झितवर्त्मसु। मृगद्वंद्वेषु पश्यंतौ स्यंदनावद्धदृष्टिषु इ
त्यादौ विति चेत्। अत्रदीक्षिताः। श्रौत्येवेयं। ष्यञ्प्रत्ययप्रकृतिभूतेन सदृशशब्देन सादृश्यवदभिधानेपि
भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकशक्तत्वात्तदुक्तसादृश्यस्यैव वाक्यार्थान्वयित्वादित्यादिरित्याहुः। न्या
यपंचाननादयस्तु यत्र सदार्थविशेषणस्योपमानत्वनियमस्तत्रैव श्रौती। इवादिविशेषणीभूतस्य चंद्रा
 देरुपमानत्वनियमात्। सादृश्यादिपदक्ष्यावे विशेषणस्य च नोपमानत्वनियमः। चंद्रसादृश्यमित्यादौ तथात्व

पिचंद्रमुखयोःसादृश्यमित्यादौव्यभिचारादित्याहुः।तस्माद्धर्मलुप्तायाःपंचभेदाःस्थिताः।अत्रदीक्षिताः।द्विर्भा
वेपिधर्मलुप्तादृश्यते।यथापटुपटुरिति।प्रकारेगुणवचनस्येतिसूत्रेणसादृश्येद्विर्भावविधानात्।प
टुसदृशइत्यर्थः।वस्तुतोऽपटावयंप्रयोगः।नचैवंवाक्यगा।कर्मधारयवदुत्तरेष्वितिसूत्रेणतत्रैकपद्य
विधानात्।नापिसमासगा।वास्तवसमासत्वाभावादिति।तन्न।आतिदेशिकसमाससाधारण्येनैवा
त्रोपमाविभागकरणेनआतिदेशिककर्मधारयवद्भावेपिसमासगायामेवतदंतर्भावसंभवात्।अत
एवपटुपटुरित्यादौसमासत्वप्रयुक्ताःपुंवद्भावान्तोदात्तत्वादयोपितत्रसिद्ध्यंतीति।केचित्तु।वाचकध
र्मलुप्तायांएतद्भेदस्याधिकांनतुकेवलधर्मलुप्तायां।नचात्रद्विर्भावस्यसादृश्यवाचकस्यसत्त्वान्नवा
चकलोपइतिवाच्यं।सादृश्येद्योत्येद्विर्भवतइतिदर्शनात्।द्विर्भावस्यवाचकतायाभाष्यकैय्यटविरुद्धत्वा
दित्याहुः।तन्न।द्योतकत्वेपिउभयलुप्तत्वासंभवात्।अन्यथाइवादीनांद्योतकत्वपक्षेचंद्रइवेत्यादावपिलु

लोपमात्रप्रसंगात्। पक्षांतरेणतादृशार्थबोधेसहकारित्वरूपस्यद्योतकत्वस्यसत्वेनद्वाचकत्वस्यपदांत
रेस्वीकारस्यावश्यकत्वाच्च। यदीयमेकलुप्तायदिवाद्विलुप्ताउभयथापिसमासमध्येतिभौवान्नकोपिदो
षइतितत्वं। तत्रवाक्येश्रौतीधर्मलुप्तायथामम। आलोक्यचंद्रमसमिवबरवर्णिनितावकंवदनं। नभवंतिम
नसिकेषांव्यापाराःपंचबाणीयाः। अत्रमुखचंद्रयोरूपमायांसाधारणधर्मस्याप्रयोगएवलोपः। नचैता
दृशस्थलेसाधारणधर्मस्यइवशब्देनैवोपस्थितिरितिप्रागभिधानात्कथमेतदितिवाच्यं। तत्रधर्मत्वेनैवध
र्मोपस्थितेर्व्यवस्थापितत्वेनआह्लादकत्वादितत्तद्रूपेणधर्मानुपस्थितेरनुपपत्त्यभावात्। अतएवचंद्रइव
मुखमित्यस्मात्मुखमाह्लादिकंनवेतिसंशयोननिवर्त्ततइतिबोध्यं। अतएवतत्तत्प्रकारेणैवधर्मोप
स्थितिंवदंतोग्रंथस्वरसानभिज्ञाइतिबोध्यं। आर्थीयथामम। प्रत्यूषकालरजनीकरमंडलेनतुल्येनसुंद
रिकपोलतलद्वयेन। अन्नमतांसुकृतिसंततिमंजरीणांत्वंव्यंजयस्यहहधन्यतरस्यकस्य। समासेश्रौ

तोधर्मलुप्तायथा।लद्धार्सएएणच्चिरंमुखंहिपसीगाहेणिसाअरवुइएा।सीआरकत्तसवुहसाहित्तिवि
सहरविसोमहिल्लउअणिग्धा।अत्रसीताविशेषयोःसाधर्म्यमनुपात्तमर्थगम्यं।आर्थीयथा।अग्घा
इल्लिवइचुंवइछठेइअअम्मिजणिअरोमंचो।जाआकवोलसरिसाइपहिअमहुअउप्फाइम्मा।अ
त्रजायाकपोलसदृशानीतिसमासः।सदृशपदप्रयोगादार्थी।तद्धितेआर्थीधर्मलुप्तायथाममामुख
ममृतद्युतिकल्पंकपोलदेशोमुकुरदेश्यः।तस्याहृशांविलासाःकुवलयदलमेदोदेशीयाः।तेनतुल्य
मितिविहितवतिप्रयोगेतुधर्मलुप्तानसंभवति।तस्यक्रियासाम्येविधानेनक्रियारूपसाधारणधर्म
प्रयोगंविनानुपपत्तेः।अथोपमानलुप्तामाह।वाक्यसमासोभयगोपमानेलोपइति।वाक्येसमासेच
उपमानलुप्तेत्यर्थःनतुतद्धितेपि।वत्यादेस्तद्धितस्योपमानवाचकपदोत्तरमेवविधानेनउपमानानु
पादानेनतदसंभवात्।नापिश्रौतीयं।इवादीपदानामुपमानानंतर्यनियमेउपमानपदंविनाऽन्वया

बोधकत्वात्। अत आर्थी द्विविधैवेयं। तत्राद्याक्रोयथा। सअलंकरणपरवीसामास्मिरविरंप्रणंस
रसकब्बुसारी सइअहवणासुब्बईसरिसंअंसंसमेत्तेण। अत्रैव कब्बसरइत्यत्र कब्बसममिति। स
रिसेत्यत्र णाणमिति पाठे च समासगेति काव्यप्रकाशकृत्। नन्वियं कथमुपमानलुप्ता। चंद्रस्य सदृ
शमित्यत्र चंद्रस्यैवोपमानताप्रतीतेः। काव्यस्य सदृशमित्यत्रापि काव्यमेवोपमानमिति चेत्। अ
स्य
त्राहुः। काव्यस्य सदृशमित्यस्य काव्यप्रतियोगिकसादृश्यानुयोगीति नार्थः। किंतु काव्यनिष्ठसादृश्य
प्रतियोगीत्येव। काव्यस्य प्रकृततया तदुत्कर्षायोपमेयत्वस्य विवक्षितत्वात्। अथैवं तद्वृत्तिसादृश्य
प्रतियोगिनोऽसत्वेऽनन्वयः स्यात्। किंचाभेदगर्भसादृश्यस्याप्रसिद्धतया कथं निषेधः। न चात्राभेद
गर्भसादृश्यं स्वस्मिन्नेव प्रसिद्धमिति वाच्यं। उपमोदाहरणत्वविरोधादिति चेत्। न। दर्शनश्रवण
विषयतया उत्कृष्टगुणस्योपमानत्वविवक्षणात्। दर्शनश्रवणाविषयस्यैवोपमानत्वनिषेधात्। अ

अ.का.कौ.
।।५५।।
55

तोत्रानुपादानमात्रंउपमानस्यविवक्षितंनतुवस्तुतोप्यसत्वं।नैअन्वयेत्वसत्वमेवाभिमतमिति।अन्ये
तु।सदृशपदमत्रोपमानेलाक्षणिकं।नचैवंतदनुपादानंनास्तीतिवाच्यं।यादृशपदेनउपमानोपा
दानेतदुत्तरवर्त्तिनाइवादिपदेनउपमानत्वंबोध्यते।तादृशपदेनानुपादानेइत्यर्थात्।नचसदृशा
दिपदेनउपमानोपादानेतदुत्तरंइवादेःसंभवः।नचात्रोक्तरीत्यासदृशपदस्योपमानपरत्वेसादृ

द्वि

श्यार्थकपदाभावेनलुप्तत्वंस्यादितिवाच्यं।सादृश्यप्रतियोगित्वस्योपमानपदार्थतयासादृशपदस्ये
वसादृश्यार्थकत्वात्।नचसादृश्यप्रतियोगितारूपस्यैवोपमानत्वस्यसदृशपदार्थत्वेश्रौतत्वंस्या
दितिवाच्यं।उपमानविशेष्यभूतायाएवप्रतियोगितायाउपमानत्वात्।प्रकृतेचपदार्थतावच्छेदकत
याउपमानेविशेषणत्वात्।सदृशपदस्योपमानेत्वेलाक्षणिकत्वेनश्रौतत्वाभावाच्चेतिव्याचख्युः।
काव्यप्रदीपकारस्तुचिंत्यमेवैतदित्याह।तस्यायमाशयः।प्रकृततयाकाव्यस्यैवोपमेयत्वमुत्कर्षा

येत्यसंगतं।स्वनिष्ठसादृश्यप्रतियोगिनिषेधस्यैव।स्वप्रतियोगिकसादृश्यानुयोगिनिषेधस्याप्युत्कर्षप
र्यवसायित्वात्।यथा।रस्यांसीतिपुरापिसंश्रृणुमहेवीरस्त्वत्कस्तादृशोयोजागर्तिजगत्त्रयीविपद्दलंक
र्मीणाहोर्विक्रमैः।शम्भुद्वारभुविप्रशस्तिरचनावर्ण्यमानेस्मरणाश्रेणीसंभृतगोत्रभून्मयजयस्तभोय
धाराबलः।अत्रहिरावणासदृशस्याश्रवणोक्त्यायथोक्तार्थलाभः।यथावा।त्वमिवकोपिपरापकृतौकृ
तीनदृश्येनचमन्मथस्तुस्तुवेइत्यत्रप्रकृतःकामः।तथाचकामप्रतियोगिकसादृश्यवानन्यादर्शनश्र
वणविषयत्वाभाववानितिबोधः।एवंवेदेपिइंद्राणीमासुमानारिषुसुभगामहमश्रवम्।नह्यस्यापरं
अ चनेत्यत्रेंद्राण्याःस्योपरांसमामितिनिरुक्तकारोक्तेरिंद्राणीसमानांनाश्रौषमित्यत्रापिइंद्राणीप्रतियोगि
कसादृश्याश्रयनारीविषयकज्ञानाभाववानहमित्येवार्थः।अथकुर्वंश्चित्तत्रापिकामवृत्तिसादृश्यप्र
तियोग्यन्योदर्शनाद्यविषयइतिबोधंस्त्रीकुर्याः।तर्हिइवादिपदोपमानपदोत्तरमेवप्रयोगइतिनि

नो

यमव्याघातापत्तिः। श्रौत्या अप्युपमानलुप्तायाः प्रकृते संभवेनार्थ्येवेति नियमस्यापत्तिश्च। इवादिपदानां यदु
त्तरं प्रयोगस्तस्यैवोपमानताधीरिति नियमभंगश्चेति दिक्। अत एव बुंडोलं तमरिहसीति वक्ष्यमाणे
नात्रोपमानलोप इत्यलंकाररत्नाकरः। एतेन तत्रोपमानस्यासत्वं नाभिमतं किं त्वप्राप्तिरेवेत्युपमान
लोपत्वेति तदुपरि रसगंगाधरदूषणमपास्तं। उक्तरीतेस्तत्राभिसंधानात्। तस्मादत्तदुदाहरणीयं·
चंदसरिसमुहेसे सरिसो अमअस्स मुहरसो ति स्सा। सकअग्गाहरहत्ता अल्लुचुंबलांकुस्स सरिसं से।
अत्र सकचग्रहरभसहठचुंबनं कस्य सदृशमिति उपमानस्याप्रयोगः। समासे यथा। यस्य तुलामधिरो
हसि लोकोत्तरवर्णयति मलोज्झरैः। कुसुमकुलतिलकचंपक नवयंतं जातु जानीमः। द्विविधंयमिति प्राची
नानुरोधादुक्तं। वस्तुतस्तु उपमानलुप्तात्तद्धिते न संभवति। यथा। चंचत्कः चूडत्क इति। तथा च कैयटः। अ
चंचन्न यश्चंचन्निव दृश्यते स चंचत्कः। यथा मालिः स्यंदमानप्रभत्वात् अबृहन्नपि बृहन्निव प्रसृतप्रभत्वा

स्यादृश्यते सन्नृहल्लकइति। अत्र हि चंचलत्वं नृहत्वं च धर्मः। मण्यादिरुपमेयः। कन्प्रत्ययश्च वाचकः। चंचलत्वाद्या
श्रयस्य चाऽप्रयोगः। न चेदमुत्प्रेक्षामणौ चंचलत्वाद्यभावात्साधारणधर्मस्योभयवृत्तावेवोपमास्वीकारा
त्। तथाचायं मणिः चंचलत्वप्रकारकसंभावनाविषय इति धीरितिवाच्यं। आरोपितेनापि चंचलत्वेन साधार
ण्योपपत्तेः। वास्तववृत्तित्वस्यालंकारतायामप्रयोजकत्वात्। वस्तुतोऽत्रोत्प्रेक्षालेशं केव नास्ति। तथा
हि। कन्प्रकरणे चंचद्बृहतो रूपसंख्यानमिति वार्त्तिकं। इवे प्रतिकृताविति कन् च सादृश्यार्थ एव भवति। अ
न्यथा चंचत्यादीनामप्युपमानत्वमसिद्धं स्यात्। नापीयमतिशयोक्तिरिति वाच्यं। मण्यादेः प्रयोगसत्त्वात्
आयःशूलिकइत्यत्र ठक्प्रत्ययस्येवाद्यर्थेनुशासनाभावेन क्रूरोराराद्युपमेयप्रयोगाभावेन च तथा
त्वस्वीकारात्। एमकइत्यादीनामप्युपमात्वोच्छेदप्रसंगाच्च। प्रतिकृत्यर्थे प्रत्ययविधायकेनानुशासने
न सादृश्यार्थ एव तद्विधानाच्च। अन्यथा सर्वत्राप्यव्यवस्थापत्तावुन्मत्तकलहः स्यादिति दिक्॥॥ अथवा

च५

चकलुप्तामाह। नवाक्यगाजकलुप्ता। द्योतकलुप्तोपमा। वाक्ये तद्धिते च न संभवति। मुखं चंद्र इव रमणीय
मित्यत्र सादृश्याप्रतीतेः। कल्पबादीनां द्योतकतया तत्प्रयोगे द्योतकलोपस्यैवासंभवात्। वाक्यपदं त
द्धितस्याप्युपलक्षणमित्यर्थः। अत एव तद्द्वयमुत्सार्य नमुखेनैकार्थं दर्शयति। वृत्तौ कर्माधारक्यचिक्य
ङिः स्याद्द्विधा णमुलि। वृत्तौ समासे। कर्मक्यचि आधारक्यचि क्यङि। कर्मणि णमुलि कर्तृणमुलि चेति ष
ड्विधेत्यर्थः। तत्र समासे यथा। हीसज्ञविद्रुमअंबसिंदूरारुणगंडकुंभच्छाअं। मंदरधाउकलंकिअवा
सुइमंडलति। अक्कलंर इविंबे। इह विद्रुमवत्ताम्रमिति। उपमानानि सामान्यवचनैरिति समासः। उपमा
वाचकस्य समासांतर्गतत्वात् अप्रयोगः। अत्रोपमानधर्मयोः समासः। क्वचित् त्रयाणामपि। यथा। जि
तमिह भुवने त्वया यदस्याः सखि वकुलावलिवल्लभाग्निजाता। परिणतविसकांडपांडुमुग्धस्तनपरि
णाहवलासवेजयंती। अत्र विसकांडमुपमानं पांडुत्वं साधारणधर्मः स्तन उपमेय इति त्रयाणां समा

सः। यत्तु कोकिलालापिनीत्यत्र कोकिलाविवालपतीत्यर्थे कर्त्तर्युपमाने इति सूत्रेण णिनिप्रत्यये वाचक
लुप्ता इति रिक्ता। तथा च चित्रमीमांसायां वाचकलुप्तासंग्रहश्लोकः। यं पश्यन्ती पदं शं सपदि मनसिजः कीट
नाशं सनष्टुः। स्वांते योतः पुरीयत्यतिभजनकृतस्लं कुमारीयति द्राक्। मूलस्तंभायते यस्त्रिभुवनभवने को
किलालापिनीं द्राग्वामांगकल्पवल्लीश्वयति कुवलयश्यामलं तं भजामि। इति तन्न। उपपरमतिङ्कृतिसमास
स्य तत्रापि सद्भावेन समासगणनेनैव तल्लकोडीकारात्। विभाजकतावच्छेदकधर्मानवच्छिन्नत्वएवाधिक्य
स्योद्भावयितुमुचितत्वात्। नचैवं वत्यादीनामपि तद्धितत्वादिना विभागे न्यूनत्वापत्तिरिति वाच्यं। इष्टापत्तेः।
विभागस्यैच्छिकत्वात्। इयानेव हि विशेषः। तद्धितत्वे साक्षाद्विभाजकोपाधौ वतित्वादयस्तत्र परंपरया विभा
जकाः वतित्वादिना विभागे तु त एव साक्षाद्विभाजकोपाधय। किंतु समासत्वमेव विभाजकतावच्छेदकं व
इतां कथं तदवच्छिन्नस्थल एवाव्याप्तिरुद्भाव्यता इति नवीनमेतद्दूवदीयं पांडित्यं न विद्मः इति। कर्मक्यचि यथा

ममा।घर्मागमापगमकालसमुत्सुकानांदृष्टांडलीसपदिदंडकबर्हिणानां।कादंबिनीयतितनूं रघुनंदनस्य
सौदामिनीयतिमुदाजनकेंद्रकन्या।अत्रोभयत्रोपमानादाचारेक्तिकर्मणिक्यच्।अधिकरणाक्यचियथा
ममा।भूधरीयतिपयोधरद्वये चंद्रमस्यतिमुखेतवास्यदृक्।विद्रुमीयतिरदच्छदांतरेदर्पणीयतिकपोलमं
डले।इहसर्वत्राधिकरणाच्चेत्यधिकरणेक्यच्।भूधरेइवाचरतीत्यादिरर्थः।क्यङ्।यथा।चंडश्चंडकराय
ते मृदुर्गतिर्वातोपिवज्रायते माल्यंसूचिकुलायते मलयजालेपःस्फुलिंगायते।आलोकस्तिमिरायते वि
धिवशात्प्राणोपिभारायते हा हंतप्रमदावियोगसमयःसंहारकालायते।अत्रकर्तुःक्यङ्सलोपश्चेत्य
नेनउपमानादाचारेकर्त्तरिक्यङ्भवति।उपमानवाचकपदस्यसकारांतत्वेसकारलोपश्चेत्यर्थकेनसू
त्रेणक्यङ्।अत्राचारःप्रत्ययार्थः।अभ्याहृतस्यइवपदस्यचतद्भिन्नवृत्तित्वंतद्वृत्तित्वंचार्थः।तथाच
मेघभिन्नवृत्तिमेघवृत्तिश्रीरामविषयकाचारानुकूलकृत्याश्रयइत्यर्थः।ननुप्रकृत्यर्थस्यमेघादेराभे

जा॰४

द्वाविवार्थेऽन्वयः। इवार्थस्य च वृत्तित्वस्याचारे प्रत्ययार्थेऽन्वय इति पर्यवसितं। न चैतद्युक्तं। प्रत्ययार्थानन्वि
तस्य प्रकृत्यर्थस्यान्यत्रान्वयासंभवात्। प्रत्ययार्थे प्रकृत्यर्थभिन्नस्यान्वयविरहाच्चेति चेत्। न। उक्तस्थलेऽनु
पमानादिति वचनसामर्थ्यादिवार्थविशेषणीभूतस्य प्रकृत्यर्थस्यान्वयाभ्युपगमात्। आख्यातार्थकृतौ
तदर्थवर्त्तमानत्वान्वये न हि तौ। यन्नियमाभावाच्च। अत्र वदंति। पौरं सुतीयतीत्यादौ क्वजारी नामाचारमा
त्रार्थत्वे सुताद्यन्विते आचारे पौरादिकर्मकत्वान्वयासंभवः। न च सुताद्यनन्वितस्यैवाचारस्य पौराद्यन्वय
इति वाच्यं। प्रकृत्यर्थानन्वितप्रत्ययार्थाबोधात्। अन्यथा चैत्रो न पचतीति बाधधीसत्त्वे चैत्रः पचतीति वा
क्यात् चैत्रः कृतिमानिति बोधापत्तेः। किं वा श्रुतस्य इवादिपदस्य कल्पनापेक्षया क्वजादिशक्तिकल्पनमे
व युक्तं। न च गौरवं। सन्प्रत्ययादेरपि इच्छादिशक्तिविलोपापत्तेः। तत्रापीच्छतीत्यादेरध्याहारसंभवात्। न
त्रानुशासनबलादिच्छादिनाप्यध्याहारं बोधाच्च शक्तिरिति चेत्। क्वजारावपि समानं। अतः क्यच आचारे ज्ञा

तीयाचारोभेदस्वार्थः। अत एव सुतं सुतीयतीत्यादिर्न प्रयोगः। तथाच पौरं सुतीयतीत्यादेः सुतभिन्नपौरवृ
त्तिर्थः सुताचारजातीयाचारस्तदनुकूलकृतिमानित्यादिरर्थः। एवंच सुतपौरादेः सादृश्यविशेष्यकबोधा
नभ्युपगमेपि सुतमिवाचरतीत्यादिविवरणानुरोधेन इवादिकल्पनस्य
प्रामाणिकत्वात् आचारे वाच्ये उपमानवाचकपदात्क्यच्प्रत्ययो भवतीत्येवानुशासनार्थः। सच इवाद्य
ध्याहारेप्यविरुद्धः। न हि सन्प्रत्ययस्य इच्छायां विधानवत्क्यचोपि भेदादौ शक्तिरित्यर्थोनुशासनाल्ल
भ्यते येन तत्र शक्तिः स्यात्। अतः क्यजादेः साधारणधर्ममात्रार्थत्वात् द्योतकत्वं सर्वं दुर्वारमिति दिक्॥
यदप्येतदधिकृत्य चंद्रिकासारस्य आहुः। ननु नारीयत इत्यादौ कथमौपम्यप्रतिपादकप्रयोगाभावः क्य
ङादीनामेव तदर्थविहिततया तत्कर्मसमत्वात्। अथैषां प्रत्ययत्वेनास्वतंत्रतया इवादिप्रयोगाभावेन
सम्यगौपम्यप्रतीतिरिति तर्हि वतिकल्पबादावपि तथैव प्रसज्येत। न हि प्रत्ययतयात्स्थितान्ययोः कश्चि

द्विशेषः।कल्पबादय इवादितुल्यतयौपम्यस्यवाचकाः क्यङादयस्तुद्योतकाएवेत्यपिनइवादीना
मपिवाचकत्वसंदेहात्।अस्तुवातेषामपिवाचकत्वंतथापिसमुदितमेवपदंवाचकंप्रकृतिप्रत्ययौस्व
स्वार्थवाचकाविति मतद्वयेपिवत्यादिक्यङाद्योःसाम्यमेव।सत्यमेवंतथापिप्राचीनोपरोधनियंत्रितो
यमाचार्यः उपरोधोनकर्त्तव्यइत्याभाति।विद्वानपिईदृशानिदुर्यशःशंकुसंचितानिसंकटानिप्रविश
तीत्यत्रकिंब्रूमः।यत्तुकेनचिदुक्तंवत्यादयइवाद्यर्थेनुशिष्यन्तेक्यङादयस्त्वाचारइतिवैषम्यमिति
एतदपिस्फुटतरं।नहिक्यङादयआचारमात्रार्थाः।किंतुसदृशाचारार्थाइति।तदप्यतएवपरास्तं
सदृशाचारस्यक्यङर्थत्वकल्पनेप्रमाणाभावात्।अपिच।उपमानादाचारइतिह्यधिकारःउप
मानार्थकपदोत्तरंआचारार्थेक्यङादयोभवंतीतिसूत्रांतरैकवाक्यतयाअर्थः।तथाचयदिइवाद्यध्या
हारोनक्रियतेतदाप्रकृतेउपमानार्थकत्वमेवनस्यादितिक्यङादयएवंतदुत्तरंदुर्लभाःस्युरिति।क्य

जादीनामुपमानपरतानियमस्तुल्यस्यात तेषां श्रवणमात्रेणौपम्यस्य तद्वाचकस्येवादेर्वा आक्षेपल
भ्यत्वात्। अत एव वेयं श्रौत्येव कज्जादेरुपमानोत्तरत्वनियमादिति न्यायपंचाननादयः। प्रकृत्येव ल
क्षणया सादृश्यप्रतिपत्तिरिति मतेनेदं। समुदायस्यैव तत्सादृश्यप्रयोजकधर्मचरणकर्त्तृशक्तत्वमि
ति नयेपि सादृश्यसादृश्यविशिष्टान्यतरमात्रवाचकपदाभावाद्वाचकलुप्तेति केचित्। तदसत्। क्वि
पोपि त्रयलुप्तोदाहरणत्वानुपपत्तेः। तत्रापि प्रकृतेः सादृश्ये लक्षणासंभवात्। अत एव तद्वाचकस्य
वादेर्वा आक्षेपलभ्यत्वादित्युक्तं न्यायपंचाननादिभिः। कज्जुनादीनां वाचकमात्रलुप्तोदाहरणत्व
विरोधाच्च। यथा हि सादृश्यमात्रवाचकत्वाभावात्तल्लोपः तथा आचारमात्रवाचकत्वाभावात्तल्लो
पस्त्यस्यापि स्तुवच्चत्वादिति। अयं। उपमानोपमेयनिष्ठसदृशधर्मस्योपमाप्रयोजकत्वात्तत्प्रा
ज्यस्योपमानोपमेययोः संबंधस्य साम्यस्य ततोन्यत्वात्तद्वाचकत्वं कज्जादीनामिति चक्रवर्ति

नः। अत्रापि साधर्म्यातिरिक्तः साम्यरूपः संबंधोन्वेषणीय इति न्यायपंचाननाः। उभयनिष्ठस
मानधर्मबुद्धिग्राह्यं सादृश्यं पदार्थान्तरमित्यभिप्रायेण चक्रवर्त्तिनाप्युक्तिरिति तत्त्वं। कर्मार्थकणमुलि य
थामम। सांवर्त्तिकतीक्ष्णांशुतिरश्चं पश्यति सुधाकरं बाला। विरहे ग्लानिधानिधायं निर्द्धातिस्तनगतं
नखांकनं। अत्रोभयत्राप्युपमानात्कर्मणि चेति सूत्रेण णमुल्। णमुल्प्रकृतिभूतस्यैव धातोराख्या
तान्तस्यानुप्रयोगोनुशासनसामर्थ्यात्। कर्त्तरि णमुलि यथा मम। त्वद्विप्रयोगदहनज्वरदह्यमानेयं यमु
णाह्रदि वसंति पुरा मृगाक्ष्याः। ते वह्निमध्यविलसद्बिसतन्तुनाशं नष्टास्त्रपाधूतिविवेकमुखाः सम
स्ताः। अत्र प्रागुक्तसूत्रे चकारेणकर्त्तुरनुकर्षात्कर्त्तरि णमुल्। पूर्ववदेवात्र ह्वादेरध्याहारः। यत्तु भे
दः सजातीयश्च णमुलोर्थः। भेदः सकर्मकक्रियायोगे कर्मणि। अन्यत्र सजातीयक्रियाकर्त्तर्यन्वेति त
थाच मध्ये निदाघघर्मांशुदर्शं पश्यतीति परेणोक्तं तस्य निदाघघर्मांशुभिन्नत्वं कर्मकं यन्निदाघघर्मांशुद

शेनं तद्वंतः परे इत्यर्थः। स पुनः पार्थसंचारं संचरत्यवनीपतिरित्यत्र तु पार्थभिन्नत्वे सति पार्थसंचारसजातीयसंचा
रवानित्यर्थः। अत एव घर्मांशुदर्शी घर्मांशुं पश्यतीति पार्थसंचारं पार्थः संचरतीत्यादिर्न प्रयोगोऽतः पूर्णोपमे
वेयमिति। तन्न। भेदांशेलामुलशक्तिबोधकानुशासनाभावात्। अपि च। अन्वयितावच्छेदकावच्छिन्नप्रति
योगिताकत्वसंबंधेन प्रकृत्यर्थस्य भेदान्वयो नियतः। देशकालादिकृतभेदविवक्षायां तथा प्रयोगस्यापी
ष्टत्वात्। लंकापुरादतितरां कुपितः फणीव निर्गत्य जातु पृतनापतिभिः परीतः। क्रुद्धं रणे सपदि दाशरथिं द
शास्यः संख्ये दाशरथिर्दाशरथिमहो ददर्शेत्यनन्वयालंकारे भेदस्याप्रतीत्या न भेदेपि शक्तौ प्रमाणमस्ति।
न च तत्र भेदस्यानन्वय एवेति वाच्यं। प्रत्ययार्थत्वं कल्पयित्वा तदनन्वयकल्पनाया अनौचित्यात्। अन्यथा
ऽतीतकृतिकं चैत्रं चैत्रः पचतीति प्रयोगापत्तेः। वर्त्तमानत्वस्य बाधेन कृतावनन्वयात्पाकानुकूलकृतिमा
निति बोधसंभवात्। शक्यतावच्छेदकतापर्याप्त्यधिकरणस्यैव शक्यत्वाच्च। अत एव श्रोतव्यः श्रुतिवाक्ये

मायूरस्यत्र श्रुतिपदस्य प्रमाणशब्दे लक्षणा। अन्यथा तद्घटकपदार्थेषु खंडशक्तौ प्रमाणाभावस्य शक्तेर्व्वा
घुसं भवेतद्वितेधात। प्रश्चापि लक्षणैवास्तु को दोष इति चेत्। श्रौतीत्वानुपपत्तिरेवेति दिक्। एवं त्रयोदश
विधा एकलुप्ता व्याख्याता। अथ द्विलुप्ता व्याख्यायते। धर्मद्योतकलुप्ता क्विप्समासयोरिति। न हीयं वाक्ये
संभवति। मुखं चंद्र इत्यतः सादृश्यप्रतीतेः। नापि तद्धितगा। वत्यादेरेव धर्मवाचकत्वेन तल्लोपाभावात्। तत्र
क्विपि यथा मम। वारांति वारिधाराः पवनाः पवयंति वज्रयति विद्युत्। घनति घनाघनमाला पथिकानां काम
लुनानां। सर्वप्रातिपदिकेभ्य आचारे क्विब्वक्तव्य इति भाष्यकारवचनात्। बाला इवाचरंतीत्यादावर्थे क्वि
प्। तस्याचारार्थकतायामपि तस्य सर्वलोपित्वेनाश्रूयमाणत्वाद्धर्मलोपव्यवहारः। इवाद्यप्रयोगस्तु स
र्व्व एव। समासे यथा। अयं कठरस्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्यकंठः। दृशं दधौ विस्मयनिस्तरंगा
मलं घितायामपि राजसिंहः। अत्र राजा सिंह इवेत्युपमितिसमासः। न चात्रस्युरुत्तरपदे व्याघ्रपुंगवर्षभ

कुंजराः।सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः इति सिंहपदं श्रेष्ठमात्रपरमिति वाच्यं।कंठेवक्रीकु
त्यपश्चादेव लोकेनोपपत्तये उपमितसमासस्यैव युक्तत्वात्।न चैवं सामान्यधर्मप्रयोगान्नात्र समासानुप
पत्तिरिति वाच्यं।तत्रोपमानिमित्तसामान्यधर्मप्रयोग एव समासनिषेधात्।शौर्यादिगुणात्तत्र सिंहोप
मायां सिद्धायां पश्चादेव तत्स्वभावस्य तत्र वर्णनात्।अत्र दीक्षिताः।धर्मवाचकलुप्तात्र द्विते पि संभवति·
यथा।नरुणां ये सेनमानानां संसारोप्यपवर्गति।तं जगत्यभजन्मर्त्ये श्वंचा चंद्रकलाधरं।अत्र हि चंचेवचं
चाद्भृतिरेवेप्रतिकृताविति कः।लुम्मनुष्ये इति तस्य लोपः।लिंगं तु प्रकृतिवदेव।एवं वधिकेव वध्रिकाहत्यादा
वपि।अत्र हि साधारणधर्मस्याऽचेतनत्वादेर्वाचकस्य च कस्य लोपः स्पष्ट एवेत्याहुः।अन्ये तु चंद्रमौलिभ
जनमाहिल्यरूपधर्मप्रयोगान्नात्र लोपः।न च तस्य मत्वं विशेषणत्वेनोपादानादुपमानभूतचंचायामन
न्वयान्न साधारण्यमिति वाच्यं।यद्भक्तानां सुखमयः संसारोप्यपवर्गति।तं शंभुमभजन्मर्त्ये श्वंचास्वात्म

ह्लिताकृतेरित्यत्रापिधर्मलुप्तत्वप्रसंगेतत्रधर्मश्रवणमितितस्योक्तिविरोधापत्तेः।उभयत्रशाब्दान्वयबो
धंविनापिवस्तुततदुभयवृत्तित्वज्ञानमेवसाधारण्यनियामकमितितत्रापितुल्यं।उपमेयतावच्छेदकत्वे
नैवात्रचंद्रमौलिभजनराह्लित्यंविवक्षितंसाधारणधर्मस्तुस्वात्मह्लिताकरणमेवेतितुशमथमात्रचंद्र
इवमुखंरमणीयमित्यादावपिधर्मांतरप्रयुक्तसादृश्यंविवक्षितमितिशपथसंभवाद्धर्मलोपापत्तेरि
तिप्राहुः।कश्चित्समोजकलुष।उपमेयद्योतकयोर्लोपेउपमाक्यच्प्रत्ययेभवति।यथः।यथा।मासंभाव
यमांगिरामधुरयाकुर्पानश्चित्तोत्सवंवातांदोलविलोलपंकजदलद्रोहस्पृशावादृशा।आयातेमयिय
त्रकारभवतीकृत्योचितीसंभ्रमंतेनैवाद्यममेंदुसुंदरमुखिस्वात्मामहेंद्रीयति।अत्रमहेंद्रमिवात्मानं
आचरतीत्यर्थेक्यच्।यद्यप्यात्मैवोपमेयस्तथापिकर्तृकर्मभूतयोरात्मनोरुपाधिभेदेनभिन्नत्वविवक्ष
याकर्मीभूतस्यात्मनोश्रूयमाणत्वादुपमेयलोपव्यवहारः।धर्मोपमानलुप्ताद्वितीयावाक्यइति।धर्मोप

अ·का·कौ·
॥६३॥
63

मानलुप्तासमासेवाक्ये चेत्यर्थः। तद्धिते तु नेयं संभवति। उपमानपदोत्तरमेव तद्विधानात्। अत एव नन्वोत्य
पि। उपमानपदाप्रयोगे इवादेरप्रयोगात्। तत्र समासे यथा। तुंडोलत्तोमरिहसिकंटककलिआइ केअइ
वणाइ। मालइकुसुमसरिच्छं भमर भमंतो ण पाविहसि। अत्रापि मालतीकुसुमसदृशमित्यस्य कुसु
मनिष्ठसादृश्यप्रतियोगिनमित्यर्थः। वाक्ये यथा मे॥ जं तुज्झ सईजाआ असइ ॐ सुह अजं अहो। ताकिं
फुट्टउवीओ तुज्झ समाणो जुआ णत्थि। त्वन्निष्ठसादृश्यप्रतियोगी युवा नास्तीत्यर्थः। यद्वा। मालइकु
सुमेणासमं इति पूर्वश्लोके पाठे वाक्यगाबोध्या। अत्र दीक्षिताः। वाचकोपमानलुप्तास्वरूपत एवा
नुदाहृता समासे क्विि। तथा धर्मोपमानलुप्ताहूत्तिवाक्ययोरवोक्तानतद्धितेपि। तथाहि। काकागमन
मिव तालपतनमिव काकतालं। समासाच्च तद्विषयादिति समासानुवादेन प्रत्ययविधानाज्ज्ञापका
त्समासः। इवार्थविषयात्समासाच्छप्रत्ययः स्यादिति हितस्यार्थः। न च इवार्थे समासं विनातत्संभ

वर्त्ती। तितस्मादेव तात्पर्यमाह काकतालसमासः तत्र काकशब्दस्तदागमने तालशब्दस्तत्पतने वर्त्तते। तत्र काकागमनं
देवदत्तागमनस्योपमानं। तालपतनं तु दस्युपनिपातस्य तयोरिवशब्दस्य वाचकतालमिति समासे लोपः
स्पष्टः। तालपतनेन यथा काकवधस्तथा चौरेण देवदत्तस्येति तद्धितार्थः। तथा च काकतालीयो देवदत्तस्य व
धः स्यात् तद्धिते उपमानस्य काकवधस्य अतर्कितोपनतत्वस्य समानधर्मस्य च लोपो व्यक्त एवेति। तत्रो
च्यते। सत्यमेव काकतालीये त्यत्र छप्रत्ययप्रकृतिभूते समासे वाचकोपमानलोपोस्ति। परंतु न प्रकृतेतदनु
क्त्या न्यूनत्वप्रसंगः। तत्समासस्य स्वातंत्र्येणाप्रयोगाभावात्। तथाहि। छप्रत्ययविधानबलेन तत्र समास
सिद्ध्या यत्र छप्रत्ययो विषयस्तत्रैव समासो न तु छप्रत्ययविनिर्मुक्तेपि। विभागश्चात्र स्वातंत्र्येणाप्रयोगयो
ग्यानामेव कृत इति। वस्तुतस्तु नात्र वाचकलोपोपि। समासस्यैव वाचकस्य विद्यमानत्वात्। इवार्थविषयात्
समासात् इवार्थे छप्रत्ययविधानबलेन इवार्थ एव समासस्य वाच्यत्वात्। तथा च कैयटेन व्याख्यातम्। का

अ·का·कौ·
॥६५॥
64

कस्यागमनमिव चैत्रस्यागमनं। तालस्य पतनमिव दस्योरुपनिपात इत्येक इवार्थः तत्र समासः। तेन पतता
यथा काकस्य वधस्तथा दस्युना चैत्रस्येति द्वितीय इवार्थः। तत्र चच्छप्रत्यय इति। अवश्यं चेदं त्वयाप्युपगंत
व्यं। अन्यथा इवार्थे विहिततद्धितस्यापि तद्वाचकत्वप्रसंगादिति तत्वम्। एवं तद्धितार्थभूतायां धर्मोपमा
नलुप्तायां अपि नात्रोक्तिः। तद्धितोत्पत्तिदशायां काकतालपदस्य तालकृतकाकवधे लक्षणास्वीकारेण
तदाश्रयकाकतालपदस्य श्रूयमाणत्वेनोपमानलुप्तत्वाभावात्। न च लक्षणायां मानाभावः। उपमा
नपरत्वाभावे तदुत्तर इवार्थे तद्धितानुपपत्तेरेव मानत्वादिति कृतं पल्लवितेन। अथ त्रिलुप्तामाह। सामान्य
लुप्तहस्तो धर्मद्योतकोपमानानां त्रयाणां लोपे समासे एवेत्यर्थः। यथा। अहसरसदंतमंडलैपडिमागऊंम कपोलइ
अच्छीअ। अंतोसिंदूरिअसंखवत्तकरणिं वहइ चंदो। अत्र मृगाक्षीति। इह हि मृगस्य अक्षिणी इव अक्षि
णी यस्या इत्यर्थे। सप्तम्युपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्चेति वार्त्तिकात्समासः। उपमानवाच

कमुखपदस्यलोपः।अस्यार्थोहि।सप्तमी।पूर्वपदस्यउपमानपूर्वपदस्यचबहुव्रीहिर्वाच्यः।उत्तरेषांश्चपदो
पमानार्थकमुखपदादीनांलोपइत्यर्थंवदंतिकाव्यप्रदीपादयः।सर्वेव्याख्यातारो।वस्तुतस्तु।उत्तरपदशब्
स्यसमासांत्यावयवेरूढिरितिवैयाकरणसंप्रदायात्।उपमेयभूतमुखपदस्यैवात्रलोपनभाव्यमित्यस्म
भिर्विभावनीयं।अतोधर्मद्योतकलुप्तैवेयमुपमेतियुक्तं।कैयटस्त्वाह।अप्रयोगएवात्रलोपशब्देनोच्यते।त
थाहि।उष्ट्रमुखं अस्येत्येवविग्रहः।नचप्राणिप्राण्यंतरस्याऽवयवोभवतीतिउष्ट्रशब्दस्यतन्मुखेलक्षणे
ति।अप्रसिद्धिस्तुपक्षेनात्रोपमानादिलोपप्रसंगइति।पूर्वोक्तपक्षएवेदमुदाहरणंबोध्यं।अत्रकेचित्।उप
मानमात्रोपादानेपित्रिलोपासंभवति।यथायमायुःशूलिकइति।अत्रहि।अयःशूलमिवतीक्ष्णआचारः
तेनान्विच्छतीतिआयःशूलिकः।अत्रहिउपमेयधर्मवाचकानात्रयाणामपिलोपइति।अत्राहुः।क्रूरस्या
चारस्यायःशूलतयाअवसानादितिशयोक्तेरेवात्रविषयत्वादुपमाविरहात्।अतएवमहाभाष्यमपि।

अयःशूलमिवायःशूलं यो मृदुनोपायेनान्वेष्टव्यानर्थान्रभसेनान्विच्छति स उच्यते आयःशूलिक इति। के
यटस्त्वाह। यथा अयःशूलं तीक्ष्णमेवमन्योपि तीक्ष्ण उपायोऽयःशूलं उपचारादिति। एवं पार्श्वेनान्वि
च्छति पार्श्विक इत्यत्रापि अतिशयोक्तिरेव। यथा पार्श्वे तिर्यगवस्थानादनृजु तथान्योप्यनृजुरुपायः
पार्श्वमिति कैयटव्याख्यानात्। एवमेकोनविंशतिभेदा लुप्ताः॥२९॥ अत्र केचिदुपमाया भेदांतराण्य
ङ्गीकुर्वंति। ते यद्यपि वैचित्र्याभावादुक्तभेदेष्वेवांतर्भवंति तथाप्यवांतरवैचित्र्यसत्वानुमतत्वाच्चोदा
ह्रियंते। तथा च भरतः। एकस्यैकेन सा कार्या एकस्य बहुधा तथा। अनेकेषां तथैकेन बहूनां बहुभिस्तथा।
तदुक्तं द्वितीयभेदमाह। मालोपमोपमेयेप्येकस्मिन्बहूपमानसंबंधः। सामान्यधर्मभेदाभेदाभ्यां
सापि च द्विधा। स्पष्टोऽर्थः। तत्र साहृश्यमित्ति धर्माभेदे मालोपमा यथा। गेहं च वित्तरहिअं ऊज्जरकु
हरं व सलिलतुण्णविअं। गोहणरहिअं गोठ्ठं वतीअ वअणं तुह विउहे ए। अत्रोद्वेगजनकत्वं सर्वत्रो

पमानिमित्तधर्मः सचाश्लिष्टः श्रूयमाणस्तु यथा। वाहिव्ववेज्ज्ञंर हिउ धुएण हिउ सुअएणगेह्वा
सोव्व। रिउरिहूंसएणं विअहूसेह एिज्जोतुहविउउ। अत्र हुः सहत्वे सर्वत्र एकोधर्मः श्रूयमाणः। त
ह्रेयथा। मातेव रक्षति पितेव हिते नियुंक्ते कांतेव चाभिरमयत्यपनीय खेदं। कीर्तिं च दिक्षु वितनोति
तनोति लक्ष्मीं किं किं न साधयति कल्पलतेव विद्या। अत्र रक्षणादयो धर्मा भिन्नाः। यथा वा। जलइव
डएणं वालोविअ फुट्टइ सेलोव्व एमवाएणा हिउ। रसइ जल अव्वुउ अही खुहिओ लंघेइ मारुउ व्वएण
हअलमू। अत्र ज्वलनादयो भिन्ना धर्माः। एकत्रानेकेषामिहास्य मिति यं उपमा भरतेनोक्ता। स्येनव
र्हिणमासानां तुल्या सह तिया भवेत्। एकस्य बहुभिः सार्द्धमुपमानात् कथा। बहुष्वेकस्य सादृश्य
रूपोपि भेदस्तत्रोक्तः। यथा। चंद्रवत्संप्रकाशते ज्योतिर्भानो द्विजोत्तमाः। एकेन स्यत्वनेकेषामुपमा
परिकीर्तिता। इयं च सामान्यधर्मैक्य एव संभवति। उपमानस्यैकत्वादिति बोध्यं। तुल्यं ते शशिना

चक्रुमितिसैवक्लृप्ताभवेत्। घनाद्यवाज्ञायत्रबहूनांबहुभिस्तुसा। हरिवंशे अलावलवांबुदवृंद
कर्षीघनैर्घनान्योजयतीववायुः। प्रवृत्तचक्रोनृपतिर्वनस्थानृगजानृगजैःस्वैरिववीर्यदृप्तान्।
अत्रैकसामान्यधर्मभेदेयथा। अलक्षितगतागतैःकूलवधूकटाक्षैरिवलक्षणानुनयशीतलैर्ध
प्रणयकेलिकोपैरिव। सुवृत्तमृत्स्नालोन्नतैर्मृगदृशामुरोजैरिवत्वदीयतुरगोत्तमैर्धरणिचक्रमा
क्रम्यते। एवंचोपमोपमेयंयद्युपमानंपरोपमायांस्यात्। रशनोपमेयमुक्ताद्वैविध्यंप्राग्वदेवास्याः।
प्रथमोपमायांयदुपमेयंतदुत्तरोत्तरोपमायामुपमानंभवतिसारशनोपमा। साचद्वेधा। सामान्य
धर्मस्यभेदेअभेदेचेतिप्राग्वदित्यस्यार्थः। तद्भेदेयथामम। अधरइवोक्तिर्मधुरातवलस्मारुक्तिव
द्विशद्वर्णा। तनुरिवमनोहरादृक्कुरंगिवमृगाक्षाःसुदुःसहोविरहः। अत्रमाधुर्यादिधर्माःप्रतिवाक्यं
भिन्नाः। अभेदेयथाममैव। अतिताक्षण्यविकासादनुदिवसविज्ञंभमाणामदनायाःदृगिवग

गतिर्गतिरिव धीर्धीरिव गौर्गौरिवातिवक्रार्थः॥ अत्रैकत्वं सर्वत्र सामान्यधर्मः। भरतेतु प्रशंसानिंद
योरप्युपमाभेदस्तु कः। यथा। आलप्य तां विश्वालासीं तुतोष मनुजाधिपः। मनुभिः साधुतां कृत्वा सिद्धिं म
न्मितीमिव। निंदायां यथा। सा त्वं सर्वगुणैर्हीनं संश्रिता पुरुषाधमं। वने कंटकिनं वल्लिर्वङ्घिरंध्रमिव द्रुमं।
यथा वा। संतिष्ठानद्वासंख्याजातिभाजो गृहे गृहे। उत्पादकान बहवः कवयः शरभा इव। यथा वा। सत्यं स
ति गृहे गृहे पुरुषाः येषां वचश्चातुरी स्वेहर्म्ये कुलकन्यकेव लभते जातैर्गुणैर्गौरवं। दुःप्रापः स तु कोपि को
विदपतिर्यद्वाग्रसग्राहिली पण्यस्त्रीव कलाकलापकुशलाचेतांसि हंतुं समाः॥ २ प्रस्याश्वरूपकवदपि भे
दाः संभवंति। तथाहि। निरवयवा द्विविधा। शुद्धा मालारूपा च। निरवयवत्वं चान्यप्रतियोगिकान्यनिष्ठसा
दृश्यप्रतियोग्यत्वाभाववत्त्ववृत्ति सादृश्यकत्वं। तत्र चंद्र इव मुखमित्यादौ स्पष्टमेवोदाहृतं च प्रागेव बहु
धा। तथापि यथा। उद्गाढ हुर्दिनविसंष्ठुलवृत्ति तारा राम्यगात्रमलनेविसततां न वैलंवी॥ आमष्टगंडतिलका।

निमुखान्यचुंबद्वागीवरेणुरचनेःसुरसुंदरीणां॥मालास्वरूपायथा।आवर्त्तोऽइवमंडलीषुपयसांवेगाइवास्यंतिका
धारास्वाईपुलायितेषुतरलोत्तुंगास्तरंगाइव।कंठेकोमलशैवलावलिमिवालंबोग्नांवहंतःसटांराजन्साहृति
कीवसंतिबहुधासिंधोःस्थितिंसैंधवाः॥समस्तवस्तुसावयवायथा।अहंरथांगनामेवप्रियासहचरीवमे।अननु
ज्ञातसंपर्कोधारिणीरजनीवनो।अत्राग्निमित्रमालविकयोश्चक्रचक्रवाकीसादृश्यसिद्धोत्तसंगमप्रतिबंधक
त्वेनधारिण्यादेर्व्याघात्रिसादृश्यसिद्धिः।यथावा।कर्णेनेववविधांगनेकपुरुषव्यापादिनारक्षिताहंतुशक्तिरिवार्जु
नेबलवती।याचंद्रगुप्तंमयासाविष्णोरिवविष्णुगुप्तहतकस्यात्यंतनिश्रेयसेहेडंवेयमिवेत्यपवर्तितन्नृपंतद्ध्यमेवा
वधीत।यथावा।श्रियइवममस्यापोहूरीकृता।विधिनिग्रहेरहमिवपरित्यक्तःपौरैरयंजलजंतुभिः।इयमपिचमांवे
दर्भीवत्सलमल्पितांबुजव्यथितवदनानाद्याप्येनंजहातिसरोजिनी।अत्रोपमांतरेणानलसरसोरुपमासिद्धा
सावयवत्वं।उपमानोपमेयानांशाब्दत्वाच्चसमस्तवस्तुविषयत्वं।एकदेशविवर्त्तिनीसावयवायथा।वर्षोदकमुद्गि

रत्नाश्चवर्णांतविलेविनाकदंबेन।एकं स्तनोऽभिषिक्तो नृपसुत इव यौवराज्यस्थः।अत्र कदंबे कलशोपमायां तयाव
संतसेनायाः स्तनेनृपसुतोपमासिद्धिः।सा चार्थगम्या।कलशसादृश्यस्याशाब्दत्वादिति एकदेशविवर्तित्वं।यथा
वा मम।निश्वासा मलयानिला इव पिकालापानुकायं गिरा रक्ताशोकलताप्रवालसदृशं पाणिद्वयं विद्युते।इक्कुप्रोल्ल
सविजृंभितं सुतनुते भ्रूंगप्रतानायते संप्राप्यासमसायकोपि भवतीलोकत्रयीनायकः।अत्र शराद्दिभिरुपमाभिनीय
कीयावसंतलक्ष्मीसादृश्यसिद्धिः।शुद्धं श्लेषपरंपरिता यथा मम।मृगमदपंकश्यामे प्रोत्तुंगे तव पयोधरे तन्वि।हार
मणिकांतिलेखा विलसति सौदामिनीवेयं।इह पयोधरपदवाच्ययोर्मेघस्तनयोरुपमया कांतिलेखाया विद्युदु
पमासिद्धिः।इयमेव मालारूपा यथा।लेखेव या चंद्रमसी कलानां रसस्य या पूरिणी वपूर्णा।निष्कैतवं स्थानमियं
रुचीनामानंदवल्लीति सरोरुहाक्षी।अत्र चतुःषष्टिकलास्मृंगारकांतीनां षोडशकलाजलेखासादृश्यं नायिकाया
इंदुलेखा सरसी सुखसादृश्यनिःपत्तिहेतुः।इयं च परंपरितभेदद्वयरसंगं गाधरागनुरोधाद्दुक्तं।वस्तुतस्तु एक

परोपस्थापितयोरपि कथं परस्परं भेदान्वयः। विद्रुमाननसेत्यादौ तु मनःसरसोरभेदान्वय एव स्वीकृतः। अत एव नेत्रैरिवोत्प
लैः पद्मैर्हस्तैरिव सरश्रियः। पदे पदे विभांति स्म चक्रवाकैः स्तनैरिवेत्यादौ एकदेशविवर्त्तित्वमश्लेषस्थल एवोपमायाः
स्वीकृतं प्रामाणिकैः। कथं तर्हि उदाहृतश्लिष्टपरंपरितस्थले तु उपमासिद्धिरिति चेत्। तदभेदज्ञानादेव। धर्माभेदज्ञा
नस्य धर्म्युपमायां नानुकूलत्वं किंत्वभेद एवेति चेत्। न। बिंबप्रतिबिंबभावादौ तदभेदज्ञानस्य साधारण्यनियामक
तायाः सर्वाभ्युपगतत्वात्। यद्यपि च तत्सादृश्यबुद्धौ वत तथेत्याग्रहः क्रियते तथापि तत्र मानसस्सादृश्यज्ञानसंभ
वेप्यत्र सादृश्यशाब्दस्यानुपपत्तिरेव। अत्र इवादिपदानामुपस्थापकानामभावात्तत्प्रकारीभूतत्वेनापि नामार्था
न्वयायोगादित्यादि सूरिभिरेव विचारणीयं। भेदे परंपरिता यथा। नलिन्या इव तन्वंग्यास्तस्याः पद्ममिवाननं।
मया मधुकरेणेव पायं पायमरम्यत। अत्रोपमानोपमेयानां भिन्नपदवाच्यत्वं। यथा मम। चकोरकाणामिव कोविदा
नां राकासुधारश्मिरिवोज्ज्वलो यः। विभूषणं भूवलयस्य विद्वानवीराग्रणी राजति राजसिंहः। इयमेव माला रूपा यथा

ममेव। ज्योत्स्नायंतेतवगुणगणाःपूर्णचंद्रायसेत्वंधारायतेविशिखनिवहावारिवाहायसेत्वं। येधायंतेरिपुनृपतयो
हव्यवाहायसेत्वंभृंगायंतेप्रचुरविबुधावीरपद्मायसेत्वं। इदानीमुपमादोषाःप्राचीनाचार्योक्ताःप्रदर्श्यंते। तानाहवाम
नः। हीनत्वाधिकत्वलिंगवचनभेदाऽसादृश्याऽसंभवास्तद्दोषाइति। भेदपदंलिंगेवचनेचान्वेति। तेनलिंगभेदोवचन
भेदश्चेत्यर्थः। तत्रहीनत्वंत्रिधा। जातितःप्रमाणतोधर्मतश्च। तथाचतत्सूत्रं। जातिप्रमाणधर्मन्यूनतोपमानस्यहीनत्व
मिति। आद्यंयथा। चांडालैरिवयुष्माभिःसाहसंपरमंकृतं। अत्रचांडालत्वजातिरुपमेयजातितोन्यूना। नचनित्यत्वे
सत्यनेकसमवेतत्वरूपायाजातेरुत्कर्षाऽपकर्षानुपपत्तिरितिवाच्यं। तथापिव्यक्तावुत्कर्षाऽपकर्षसत्त्वेनहीनव्यक्ति
वृत्तित्वरूपस्यैवन्यूनत्वस्यजातौविवक्षितत्वात्। एतेनोत्कृष्टत्वमपिव्याख्यातं। प्रमाणतोन्यूनत्वंयथा। वह्निस्फु
लिंगइवभानुरयंविभाति। इहस्फुलिंगउपमानं। उपमेयसूर्यापेक्षयान्यूनपरिमाणं। उपमेयापेक्षयाउपमानस्य
न्यूनधर्मत्वंयथा। समुनिर्लांछितोमौंज्याकृष्णाजिनपटंवहन्। व्यराजन्नीलजीमूतभागाश्लिष्टइवांशुमान्। अत्रमु

निसर्ग्योरुपमायां कुत्राञ्जननीलेमेघयोर्बिंबप्रतिबिंबभावः। मुनौ मौंजीवतस्सूर्यै तत्स्थानीयधर्मोनुपन्यासः। य
थात्वरामायतो। निद्रामंदरपरीतास्योरावणस्योत्तमास्त्रियः। अनुयम्मु: पतिं वीरं मघविद्युल्लताइव। एवं अधिकत्व
मपित्रेधा। तत्र जात्याअधिकत्वं यथा। विशंतुरुह्य: शीघ्रं रुद्राइवमहौजसः। इहरुद्राणामेकादशत्वात्तद्वृत्ति
रुद्रत्वं जातिः। प्रमाणाधिक्यं यथा। पातालमिवनाभिस्ते स्तनौ क्षितिधरोपमौ वेणीदंडः पुनरयं कालिंदीपात
संनिभः। अत्रपातालाद्युपमानस्तनाद्युपमेयादधिकपरिमाणं। नचैवं अद्यापि स्तनशैलदुर्गविषमे त्यादीना
मप्यनुपपत्तिरितिवाच्यं। तत्राहार्यारोपेदुष्टत्वाभावादिति। धर्माधिक्यं यथा। स्वरश्मिवं चलं च क्रंदयद्वोव्य
राजतसवाडवाग्निः सावर्त्तः स्रोतसामिवनायकः। अत्रवाडवाग्नेरुपमेयं नोक्तं। तत्रलिंगभेदो यथा। सैन्यानि
नद्यइवजग्मुरनर्गलानि। यथावा। चिंतारत्नमिवच्युतोसिकरतो धिङ्मंदभाग्यस्यमे। अत्र च्युतइति पुलिंगं रत्ने
ननपुंसकेनान्वेतीति काव्यप्रदीपः। च्युतासीतिनायिकाप्रत्युक्तिरितिकेचित्। वचनभेदो यथा। सक्तवोभिक्षिता

देशशुद्धाः कुलवधूरिव। इह शुद्धा इति बहुवचनाव रुद्धत्वादुपमेये एकवचनांतेनान्वेति। वेदेपि यथा। अग्निर्नियेभ्रा
जसा रुक्मवक्षसः। अग्निरिव ये भ्राजसा तो रुक्मवक्षस इति निरुक्तः। असादृश्यं यथा। ग्रथ्नामि काव्यशशिनं
वितताथार्थरश्मिं। अत्र काव्यचंद्रयोः सादृश्य हेतुधर्मो न प्रसिद्धः। न चार्थानां रश्मितुल्यत्वे सति तदिति वाच्यं।
काव्यस्य शशितुल्यत्वसिद्धावर्थानां रश्मितुल्यत्वमर्थानां रश्मितुल्यत्वमर्थानां रश्मितुल्यत्वसिद्धौ काव्यस्य
शशितुल्यत्वमित्यन्योन्याश्रयात्। असंभवो यथा। चकास्ति वदनस्यातः स्मितच्छाया विकासिनः। उन्निद्रस्या
रविंदस्य मध्ये मुग्धेव चंद्रिका। अत्रोन्निद्रारविंदे चंद्रिकाया असंभव एव। तदेते षडुपमादोषाः। क्वचित्वदो
षा अप्येते। चंद्र इव मुखं इत्यत्र जातिप्रकर्षे मध्ये द्वाणुकमिवेत्यत्र परिमाणतो न्यूनत्वं न दोषः के विसंम
तत्वात्। तथा एकत्रानेकोपमानसंबंधे वाच्य उपमेये धर्माधिक्यं। यथा। क्षीरोदवेलेव सफेनपुंजा पर्याप्तचं
द्रेव शरत्त्रियामा। नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना। अत्र वेलासादृश्ये फेन दुकूलयोः

णाद्वान्विसादृश्ये चंद्रदर्पणयोर्बिंबप्रतिबिंबभावः तत्रैवेलाप्रतियोगिकसादृश्ये दर्पणस्यात्रिप्रतियोगि
कसादृश्ये चत्वनुकूलस्याधिक्यान्न दोषः। स्वस्योपमायां तयोरुपयुक्तत्वात्। तथा साधारणधर्मवत्तासंपा
दनार्थत्वे आधिक्यमदोषः। यथा। इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः। क्षणमात्रमृषिस्तस्थौ सु
प्तमीन इव ह्रदः। इह विज्ञापितइति विशेषणं ध्यानस्तिमितलोचन इत्यत्रोपयुक्तत्वादुक्तं। तेन ह्रदपक्षे
तादृशविशेषणाभावेप्यदोषः। न च सुप्तमीनत्वप्रतिबिंबभावापन्नस्तिमितनेत्रत्वोपपत्त्यर्थं तदु— या
नात्। क्वचित्तु लिंगभेदेप्यदोषः। तदुक्तं। इष्टः पुंनपुंसकयोः प्रायेणेति। काव्यादर्शेपि। न लिंगवचने भिन्ने
नैनन्यूनाधिकतापि च। उपमादूषणायालं यत्रोद्वेगो न धीमतां। चंद्र इव मुखमित्यादावित्यर्थः। एवं प्रा
णा इव प्रियो यं मे इत्याद्यप्युदाहार्यं। अन्यदप्युक्तं वामनेन। लौकिक्यां समासाभिधायामुपमाप्रपंचेव·
लौकिक्यां समासगम्यायां चोपमायां उपमाप्रपंचे प्रतिवस्तूपमादौ च लिंगभेदः प्रायेणाऽदुष्ट इत्यर्थः।

लौकिक्यां यथा। छायेव पुरुषस्तस्याः पुरुषश्च वस्त्री॥ति। छायापदे पुंस्त्वस्य पुरुषपदे च स्त्रीत्वस्य बाधितत्वा
त्तत्रति यौगिकसादृश्यवृत्तेरनस्य तत्पदाप्रयोगेऽसंभवात्। न चांगने वांगनेपि गंतुमेष प्रकंपते। इयं सौरा
ष्ट्रजा नारी महाभटश्च वोद्भटेत्यादावपि ज्ञेयं। समासाभिहितायां यथा। अनुभवन्नवदोलमृतूत्सवं पटुरपि
प्रियकंठजिघृक्षया। अनपदासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः॥ यथा च। निविष्टायाः कोपा
द्गुरुसदसि पंकेरुहदृशः पदोपांते छायामुपनयति मूर्द्धः प्रणयिनि। तथा च सुलीलाकमलरजसा दूषि
तमिति ध्रुवं मुक्ता मुक्ताफलपरिणताचाप्यकलिकाः॥ भुजलतां पंकेरुहसदृशश्चेत्युभयत्रापि लिंगभेदः। ए
वं साधारणधर्मसमासेपि यथा। निर्मुक्तरोषधवलेतुरगेंद्रमंथविक्षुब्धदुग्धमयसागरगर्भगौरैः॥ राजन्नि
दं बहुलपक्षरलन्नरगांकंठेदोज्वलैस्तव यशोभिरशोभि विश्वं। यथा वा। मुक्तं मुक्तागौरमिह सीरमिवाभ्रं वी
पाम्बृतलनिः मैहानीलशिलासु। भास्त्री श्यामेरंशुभिराश्रु द्रुतमंभश्छायामच्छामच्छति नीली सलिल

अ.का.कौ.
॥७१॥
71

स्यप्राये लोत्युक्ते हंसीव धवले त्यादेर्दुष्टत्वमेव। उपमाप्रपंचे यथा। शुद्धांतदुर्लभमिदं वपुराश्रमवासिनो य
दि जनस्य। दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः। अत्राश्रमवासिजनलतयोर्लिंगभेदः। एवं व
वचनभेदेप्यदोषो ज्ञेयः। लौकिकां यथा। पश्यामि लोचने तस्याः पुष्पं पुष्पलिहो यथा। इहोपमानोपमे
ययोर्भिन्नवचनत्वं। समासाभिहितायां यथा। सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो विम्लानो
न विमर्दनेप्यतररसप्रस्यन्दमाध्वीकभूः। ईशस्यैष निवेशितः पदयुगे भृंगायमाणां भ्रमच्चेतोमरमय
त्वविघ्नमनघन्यायप्रसूनांजलिः। अत्र न्याय इव प्रसूनांजलिरंजलिस्थानि कुसुमानीत्युपायकारोक्ते
र्वचनभेद उपमाप्रपंचे यथा। शुद्धांतेत्यादावेव वनलतानां बहुवचनांतत्वं जनस्यैकवचनांतत्वमिति।
तथा निंदायामेव तात्पर्ये उपमानस्य हीनत्वं न दोषः। यथा। चांडालश्चरगिड्म्बद्धावेव सदृशो मम।
चांडालस्य न गर्हत्वं तिनरिड्डोन पूयच्छुति। एवं उपमापेनपदेन तद्धर्मविशिष्टोपमानबोधकतया तद्

र्मप्रतिपादनेउपमेयेधर्माधिक्यंनदोषः।यथा॥अभिहंतिहंतकथमेषमाधवंसुकुमारकायमनवग्रहः
स्मरः।अचिरेणवैक्लवविवर्त्तदारुणः कलभंकठोरइववकूटपाकलः।अत्रकलभपदेनैवसुकुमारका
यताप्रतीत्यातदंशेनतदपेक्षा।एवंन्यूनपरिमाणताप्रतिपादनेतात्पर्येपरिमाणहीनत्वमुपमानस्य
नदोषः।यथा।दिव्यहरेमुखकुहरेविस्तीर्णेपर्णेतिव्योम।चूर्णतिचंद्रःक्रमुकतिकुनकगिरिःखदिरसा
रतिखराभ्रुः।अत्रपर्णस्योपमानस्यगगनापेक्षयाहीनपरिमाणत्वेपिनसिंहमुखपरिणाहवर्णन
एवतात्पर्यं।काव्यप्रकाशकारस्तु।उपमानस्यजातिप्रमाणगेन्यूनत्वाधिकत्वेअनुचितार्थतायामेवांतर्भा
वतः।नचोपश्लोकनीयनिंदाव्यंजकत्वस्यानुचितत्वलक्षणत्वोक्तेः कथमेतदितिवाच्यं।शेषांतरलक्षणा
नंतर्गतत्वेसतिऔचित्याभावानौचित्यमित्यभिप्रायेणतथोक्तेरितितद्व्याख्यातारः।एवंधर्मगतेन्यून
त्वाधिकत्वेअपिहीनपदत्वाधिकपदत्वयोरेवांतर्भवतः।एवमुपमानोपमेययोर्लिंगवचनभेदोपिभग्नप्र

क्रमत्वान्नातिरिक्तः। तथाहि। तत्र साधारणधर्मस्योपमानोपमेयान्यतरलिंगत्वे तस्य समानलिंगेन सहैवा
न्वयेन भाव्यं। तथा च तस्यासाधारण्याभावात्कथमुपमा। अथ तत्र प्रतीयमानं साधर्म्यमाश्रित्योपमा
भविष्यतीति चेन्न हि उपात्तेन धर्मेण प्रक्रांतस्योपमारूपस्यार्थस्य स्फुटमनिर्वाहाद्भग्नप्रक्रमत्वमेवा। य
त्र तु तद्द्वयमुभयान्वययोग्यं साधारणधर्माभिधायिपदं तत्र न दोषः। यदुक्तं काव्यप्रकाशिन्यां। श्लेषमर्या
दया यत्र पदं साधर्म्यवाचकं। उभयान्वयि यत्रापि नास्य दोषस्य संस्थितिः। लिंगभेदे यथा। गुणैरनर्घ्यैः
प्रथितो रत्नैरिव महार्णवः। अत्र गुणरत्नयोर्भिन्नलिंगत्वेपि अनर्घ्यैरिति रूपभेदाभावादुभयत्रान्वययो
ग्यं। वचनभेदे यथा। तद्वेषोसदृशोन्याभिः स्त्रीभिर्मधुरतामृतः। दधते स्म परां शोभां त्वदीया विभ्रमा इव।
अत्र वेषविभ्रमशब्दौ एकवचनबहुवचनान्तौ तत्रासदृश इति सदृशशब्दस्यैकवचनांतं सदृक्शब्दस्य
बहुवचनांतं। समानः सदृशः सदृगित्यमरः। भृत इति क्तप्रत्ययांतस्यैकवचनांतं। क्विबंतस्य बहुवचनांतं।

दधतइतिदधधारणेइतिभौवादिकस्यैकवचनांतं।धा॰अधारणेइतितुजुहोत्यादिपठितस्यबहुवचनांतं
रूपमित्युभयत्रान्वयबोधसंभवात्।एवंकालपुरुषविध्यादिभेदेपिभग्नप्रक्रमएवांतर्भवति।तत्रकालभे
देयथा।अतिथिंनामकाकुत्स्थात्पुत्रमापकुमुद्वती॥पश्चिमाद्यामिनीयामात्प्रसादमिवचेतना॥इत्यत्रचेत
नायामाप्नोतीत्यन्वेतिनत्वापेतिभूतकालः।अतअपेतिप्रकृतकालेनोपमायाअनिर्वाहात्क्रमभंगः।नचा
तीतायांप्राप्तौचेतनान्वयःसंभवत्येवेतिवाच्यं।त्रैकालिकप्राप्तेरेवविवक्षितत्वादिति।तत्त्वेनतात्पर्याभावा
दितिवदंति।पुरुषभेदेयथा।प्रत्यग्रमज्जनविशेषविविक्तमूर्त्तिःप्रत्यग्ररागरुचिरस्फुरदंशुकांता।विभ्राजसे
मकरकेतनमर्चयन्तीबालप्रवालविटपिप्रभवालतेव।अत्रवासवदत्तायांविभ्राजसेइतिमध्यमपुरुषोन्वे
तिलतायांतुभ्राजतेइतिप्रथमएव।विधिभेदेयथा।गंगेवप्रवहतुतेसदैवकीर्त्तिरित्यत्रकीर्त्तौप्रवहत्वितिविध्य
र्थेसंभवतिनतुगंगायांसिद्धत्वात्।एवंपुत्रंलभस्वात्मगुणानुरूपंभवंतमीड्यंभवतःपितेव।चिरंजीवतुतेस

तुर्मार्कंडेयोमुनिर्यथेष्टंयात्रावपिबोध्यं।नन्वत्रदोषत्वमेवनास्तिकुतोतिरेकांतर्भावविचारः।तथाहि।काला
दिविशेषान्वितधर्मातिरिक्तेनउभयान्वयिनोपात्तेनास्मिन्नेनवासामान्यधर्मेणउपमासंभवेकालविशे
षावरुद्धधर्मस्यउपमानान्वयविरहेपिसत्यभावात्।यथाप्रत्यग्रमज्जनेत्यत्रविविक्तमूर्त्तित्वादिनाधर्मेण
लतानायिकयोरुपमासिद्धौविभ्राजमानत्वस्यनायिकायामेवान्वयसंभवेनलतायामनन्वयानभ्युपगमा
त्।वस्तुतस्तुसाधारणधर्मप्रयोगस्थलेइवपदेनतस्यैवोपस्थापनमितिप्रागुक्ततया।विभ्राजनमिति
धात्वर्थमात्रंतेनोपस्थाप्यतेनत्वाख्यातार्थोपि।तथाचलतानिष्ठान्योन्याभावप्रतियोगितावच्छेदकस
मानाधिकरणत्वेसतिलतानिष्ठात्यंताभावाप्रतियोगियद्विभ्राजनादितद्वतीत्वमितिशाब्दबोधः।नचा
त्रपुरुषभेदःप्रतिकूलः।एवंविधिकालभेदस्थलेपिप्राप्तेःसामान्यधर्मत्वाभावेनतत्राक्षिप्तसामान्यधर्म
द्वारिकैवोपमा।अतस्तस्याउपमानपदेनान्वयएव।अथयत्रकालाद्यवरुद्धएवार्थःसाधारणतयाविवक्षि

तस्तत्र का गतिः। यथा युधिष्ठिर इवायं सत्यं वदतीति। युधिष्ठिरो ह्यवादीदित्यन्वेति न तु वदतीति चेत्सत्यं। तत्रा
पि युधिष्ठिर इव सत्यवादी अयं सत्यं वदतीति सत्यवादित्वरूपास्मिन्धर्मे णोपमास्वीकारेण वदतीत्यस्य
युधिष्ठिरेप्यन्वयानंगीकारात्। न चात्र पौनरुक्त्यापत्तिरिति वाच्यं। यथा। धनेन पुष्णातीति वक्तव्ये पुषेर्णमु
लि रे पोषं पुष्णातीत्यत्रानुप्रयोगेन पौनरुक्त्यं तद्वदत्रापि। अथ तत्रानुप्रयोगानुशासनबलात्तथा। अत्र
तु न किमपि प्रमाणमस्तीति चेत्। यथा युधिष्ठिरः सत्यमवादीत्तथायं सत्यं वदतीति कल्पने बाधकाभावा
त्। न चात्र मानाभावः। उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासा। इति मंत्रे महाभाष्यनिरुक्तकारा
भ्यां तद्यथा जाया पत्ये कामयामाना सुवासाः स्वमात्मानं विवृणुत एवं वाग्वाग्विदे स्वमात्मानं विवृणुत इ
ति व्याख्यातत्वात्। अत एव चंद्र इव मुखमित्यत्रोभयविशेष्यकबोधांगीकर्त्तृमते यथा चंद्रस्तथा मुखमित्या
दिषु प्रकारवालिथाल्प्रत्ययवशात्तथात्वेपि अत्र मानाभाव एवेत्यपि दूषणं न युक्तं। सत्यं वदनमात्रस्य इव

पदेनोपस्थापनेनादृशःसत्यवदनानुकूलकृतिमानिति बोधेपिबाधकाभावाच्चेतिचेत्सत्यमुक्तं। परंतुप्रस्तुता
र्थप्रतीतिविघातस्यसहृदयानुभवसिद्धत्वाद्दोषत्वमेव। एवमसादृश्यासंभवावप्यनुचितार्थतायामेव
पर्यवस्यतइत्याहुरितिदिक्। यत्तु। परिणामः क्रियार्थश्चेद्विषयीविषयात्मना। प्रसन्नेनदृगब्जेनवीक्षतेमदि
क्षणा। अत्रपरिणामालंकारः पृथगेवावीक्षणेचाक्षुषएवकारणत्वं। नत्वब्जस्येतिनिर्बाधं। दृगब्जेत्यत्र
रूपकस्वीकारेचाब्जप्राधान्याद्वीक्षणानुपपत्तिः। नचोपमैवास्त्वितिवाच्यं। प्रसन्नत्वरूपसामान्यधर्मप्रयो
गस्यबाधकत्वात्तस्मादब्जस्यदृगात्मनापरिणामेनप्रकृतोपयोगादलंकारान्तरमेवेति। तत्रन्यायपं
चाननादयः। उपमैवेयंभवितुमर्हति। नचप्रसन्नत्वरूपधर्मप्रयोगस्तद्बाधकः तदतिरिक्तरमणीयत्वादि
धर्मनिमित्तसादृश्यस्यविवक्षितत्वात्। उपमानिमित्तधर्मप्रयोगएवोपमितसमासनिषेधस्यभाष्यादिभिः
क्तातिगंभीरइत्याद्यनुरोधेनस्वीकारादित्याहुः। यत्तुरसगंगाधरे। महर्षेर्व्यासपुत्रस्यश्रावंश्रावंवचःसु

धां। अभिमन्युसुतो राजा परासुरभवामुया निर्देत्युदाहृतं। तस्मिन्नित्यं। अत्रोपमितसमास एव बाधकाभावा
त्। सामान्यधर्मप्रयोगाभावात्। एवं च कश्चिद्विषयमात्रस्य स्वरूपेण प्रकृतानुपयोगात्तस्यारोप्यमाणाभिन्नत्वे
न परिणामः। यथा। वदनेनेंदुना तन्वी शिशिरीकुरुते दृशौ। अत्र वदनमात्रस्य शिशिरीकारकत्वायोगात् चंद्रा
भिन्नत्वेनावस्थानं कश्चिद्विषयारोप्यमाणस्य स्वरूपेण प्रकृतानुपयोगाद्विषयाभिन्नत्वेनावस्थानं। यथा। वदनेने
दुना तन्वी स्मरतापं विलुंपति। अत्रेंदोः स्वरूपेण स्मरतापवारकत्वाद्वदनाभिन्नत्वेनावस्थानं रूपकभेदश्च
वायं विषयविषयितावच्छेदकान्यतररूपेणानीयमानतदन्यतरकत्वस्यैव रूपकत्वात्। तद्रूपकमभेदो यउ
पमानोपमेययोरित्युक्तेरिति वदंति। अत्र यद्यपि समासे विशेषण[illegible] प्रतियोगिकाभेदस्यैव संसर्गत्वात्तत्र ण
द्बाधे द्वभिन्नवदनस्य पर्यवसानं संभवति तथापि तत्र मानसे नैव विशेष्यप्रतियोगिकाभेदसंसर्गकबोधेन
निर्वाहो वसेयः। वदनेन चंद्रेणेत्यत्र चंद्रपदस्याह्लादके लक्षणा। तथा चाह्लादकेन मुखेन विरहतापः शाम्यतीति वो

धः। एवं चात्र न कश्चिदलंकारः। मुखस्य चंद्रतादात्म्योपपादकस्य लक्षणादेरभावात् चंद्रादौ मुखादितादात्म्याप
त्त्या वर्णनीयमुखादेरनुत्कर्षेणापरिणामस्यालंकारत्वासंभवात्। न मुखचंद्रेण तापः शाम्यतीत्युक्तौ तु उपमितसमा
सस्यैव संभवाच्चेति न्यायपंचाननादयः। एवं अपारे संसारे विषयविषयारण्यसरणौ मम भ्रामं भ्रामं विगलितवि
रामे जडमतेः। परिश्रांतस्यायं तरणितनयातीरनिलयः समंतात्संतापं हरिनवतमालस्तिरयतु। इत्यत्राप्युपमि
तसमासादुपमैव। न चात्र तापहारकत्वं सामान्यधर्म इति वाच्यं। तत्र धर्मांतरेण साम्यस्य सिद्धावेव तस्य विधेय
त्वात् साधारण्येनाविवक्षितत्वात्। वृक्षांतरेपि तत्सत्त्वेन तमालमात्रोपमायां मेचकत्वादिकस्यैव तन्निर्वाहक
त्वाच्च। यदपि रसगंगाधरे। अहीनचंद्रा लसताननेन ज्योत्स्नावती चापि सुचिस्मितेन। इयं हि योषा सितपक्ष
दोषा तोषाय केषां न महीतले स्यात्। अत्र केषां तोषाय न स्यादित्युक्त्या विरहिणामपि तोषजनकत्वप्रतीतेः शु
क्लपक्षरात्रेश्च ततोषजनकत्वाभावान्नाधिक्यं तादात्म्यापत्त्यानुपपत्तिरित्युक्तं। तदप्यसत्। योषादोषयोः

समासाभावेपि सतिविरहेणाशुक्लपक्षेण अभिन्नार्थयोर्घटितरूपकेणैव तत्संभवात्। यत्तु न रहितं महीपालके
वर्यंतववर्तते। अपि तज्ज्ञानमात्रमप्यपशोयस्य विजृंभते इति विद्याधरेण परिणामध्वनावुदाहृतं। तत्तुच्छं। राजश
वृस्त्योभयार्थत्वात्तु पत्त्राण्ययोश्चेंदुनृपयोरभेदान्वयस्य विद्यमानत्वेनेत्यादाविव संभवेन परिणामस्य वाच्य
त्वात्। एतेन नतरसाधुत्वसाधुत्वविषये चित्रमीमांसायां सगंगाधरयोः कलहोपि निरस्तः। एतेन वार्थशक्तिमूलप
रिणामध्वनिप्रकरणे। पांथ मंद मते किं वा संतापमनुविंदसि। पयोधरं समाराध्य येन शांतिमवाप्नुयाः इत्युदाह
रन्नु सगंगाधरोप्यपास्तः। तत्रापि पयोधरपदवाच्ययोर्मेघस्तनयोरभेदान्वयसंभवात्। ध्वनित्वानौचित्यात्। अ
दृष्टिं वितापे स्मर हे सेतापं चित्तचिंतां परित्यज। नन्वस्ति शीतलः शौरेः पादाब्जनखचंद्रमाः इति चित्रमीमांसोदाह
ते परिणामध्वनित्वं सगंगाधरे दूषितं। आरोप्यमाणस्य विषयात्मकत्वेन प्रकृतकार्योपयोगे परिणाम इति स्व
यमेवोक्तं। तत्र प्रकृतमात्रं न परिणामशरीरं अपि तु विषयिगतायाः प्रकृतकार्योपयोगिताया अवच्छेदकीभूतं विषयि

वैशिष्ट्यमात्रताद्रूप्यं एवंचात्र नखचंद्रसद्भावे प्रदर्शनेन निषेधनादयं तव तापः शांतिमेष्यतीति प्रकृतोपयोगिताया व्यं
ग्यत्वेपि तदवच्छेदकीभूतस्य विषयिणि विषयताद्रूप्यरूपस्य परिणामस्य वाक्यवाच्यस्यौत्वाच्छक्यसंसर्गत्वाद्वास
ध्येयवन व्यंग्यत्वमिति। तदपि चिंत्यं। एकदेशस्य वाच्यत्वेप्यलंकारस्य व्यंग्यत्वानपायात्। अत एव धन्यासि या कथ
यसि प्रियसंगमेपि विश्रब्धचाटुकशतानि रतांतरेषु। नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचि
दपि स्मरामीत्यत्र व्यतिरेको व्यंग्य इति काव्यप्रकाशव्याख्याने धन्यासीत्यत्रायं धन्यासीति लक्षणाया आवश्यक
त्वात्। उत्तरार्द्धे अहं धन्येत्यस्येव व्यंग्यत्वं एवं च व्यतिरेकघटकस्य त्वमधन्येत्यंशस्य व्यंग्यत्वाभावेपि अहं धन्येत्यस्य
व्यंग्यतामात्रेण व्यतिरेकस्य व्यंग्यत्वोक्तिरिति चंडीदासः। ताद्रूप्यस्योपयोगितावच्छेदकत्वेपि परिणामशरीरत्वे
मानाभावात् चेल्लैत्यमतिप्रसंगेन॥श्री॥ स्थानस्थानविकीर्णैर्विचारमुपमागते सुखेनैव। एकत्र द्रष्टुं ये वांछंति
तदर्थमेषमेयत्नः॥ इत्युपमानिरूपणम्॥श्रीः॥ अथानन्वयमाह। यत्रैकावच्छिन्नस्तामुपमानोपमेयत्वे। अन्य

सदृशंनिषेद्धुंतमनन्वयसंज्ञमाचख्युः।उपमानतावच्छेदकधर्मएवयत्रोपमेयतावच्छेदकःसोनन्वयइत्यर्थः।एतद्धर्मा
वच्छिन्नप्रतियोगिताकंसादृश्यंतद्धर्मावच्छिन्नतरनुयोगिताकत्वमितियावत्।अतउपमेयोपमायुदासः।अनन्वय
पदार्थमाह।अन्येति।कर्मधारयोयं।स्वभिन्नमुपमानमित्यर्थः।स्वपदस्यसादृश्यप्रतियोगिपरत्वात्।नविद्यतेस्व
भिन्नस्योपमानत्वेनान्वयोयत्रेत्यर्थः।यथा।आघूर्णितंपक्ष्मलमक्षिपद्मप्रांशुद्युतिश्चैत्याजितामृतांशु।अस्या
इवास्याश्चलदिंदुनीलगोलामलश्यामलतारतारं।अत्रभैमीनेत्रमिवभैमीनेत्रमित्येकस्यैवोपमानोपमेयभावः।
नन्वयमुपमातोनातिरिच्यते।तथाहि।किंतद्भेदकं।नतावदिवार्थस्यभेदस्यस्वस्मिन्नसंभवः।व्यासज्यवृत्तिधर्मावच्छि
न्नप्रतियोगिताकभेदस्यस्वस्मिन्नपिसंभवात्।देशकालादिभेदेनस्वस्मिन्नपिस्वभेदसत्त्वाच्च।नापिफलभेदः।चं
द्रइवमुखमित्यादौमुखेचंद्रगतधर्मप्रतीतिः।चंद्रइवचंद्रइत्युक्तेतुअन्यस्मिंश्चंद्रेनिष्ठसादृश्यप्रतियोगित्वाभावोबु
ध्यतेनतुचंद्रगतधर्मोवक्तं।तस्यसाधारणधर्मज्ञानकालएवसिद्धत्वादितिवाच्यं।चंद्रश्चंद्रगतधर्मप्रतीतौबाधका

भावात्।नचइवार्थभूतेन्योन्याभावेउपमेयप्रतियोगिकत्वस्यभानेनचंद्रप्रतियोगिकभेदसमानाधिकरणत्वभानं
नसंभवति।चंद्रनिष्ठोन्योन्याभावोनचंद्रप्रतियोगिकइतिबाधज्ञानसत्वादितिवाच्यं।एतत्कालीनश्चंद्रस्तत्का
लीनचंद्रभिन्नइतिबोधंप्रतिचंद्रोनचंद्रभिन्नइतिबाधज्ञानस्यप्रतिबंधकत्वात्।बाधबुद्धिप्रतिबध्यप्रतिबंध
कभावेविरोधिप्रकारकत्वनिवेशस्यावश्यकत्वात्भेदस्यचकालिकाव्याप्यवृत्तितयातदविरोधित्वात्।इतिचे
न्न।तथासतिचंद्रइवचंद्रइत्यत्रएतत्कालीनश्चंद्रस्तत्कालीनचंद्रसादृश्यवानितिबोधापत्तेः।अतएवसंयोग
संसर्गकपर्वतविशेष्यकवह्निप्रकारकयोग्यताज्ञानसत्वेनसमवायसंसर्गकतादृशधीः।तदयंफलितार्थः।य
द्युक्तरीत्याबाधोभ्युपगम्यतेतदाज्ञानस्योपमात्वमस्माकमपीष्टंचंद्रवृत्तिधर्मवानितिबोधोप्यनुभवसिद्धतया
दुरपह्नवएव।नचतद्भेदभानेसंभवति।~~[illegible]~~तत्रचभेदांशभानाभावेनानन्वयइतिव्यवस्था।
तस्माद्वृत्तित्वंधर्मश्चइवार्थः।चंद्रवृत्तिधर्मवांश्चंद्रइत्यपिबोधः।उपमानांतरव्यावृत्तिस्तुव्यंग्यैवात्र।यत्तुचित्र